दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णप्रतिपदा
मार्गशीर्ष 10 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-29 | 1 | नवम्बर 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 २०२७ पञ्जाब-विधानसभा-निर्वाचनात् प्राक् भारतीय-जनता-पार्टीति दलं शिरोमणि अकाली-दलं च स्वकीयस्य गठबन्धनस्य घोषणां कृतवन्तौ

4 हिमाचलस्य कृषकपुत्रस्य ऐतिहासिकी सिद्धिः जयचौधरिणः 'जेडस्केलर'-संस्थायाः 'क्राउडस्ट्राइक'-संस्थया सह अधिग्रहणसन्धिः

12 सुखस्य परिभाषा(लघुकथा) मूलहिन्दीलेखिका- सुश्री संगीतादास, पूर्वविज्ञानशिक्षिका, अनुवादकः- डॉ. विमलेश झा

सिक्खपरम्परा सदैव राष्ट्राय तस्य संस्कृत्यै च सर्वस्व-त्यागभावनायाः प्रतीकम्-प्रधानमन्त्री



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्र मोदी अवोचत् यत् सिक्ख परम्परा सदैव राष्ट्राय तस्य संस्कृत्यै च सर्वस्व-त्यागभावनायाः प्रतीकम अस्ति। प्रधानमन्त्री नवदेहल्यां देहल्याः उपराज्यपालस्य तरनजीत सिंह-सन्धोः निवासे आयोजिते शब्दकीर्तन-कार्यक्रमे सहभागितां कुर्वन् इदं वक्तव्यं दत्तवान् गुरु-नानक-देवस्य शिक्षाः उद्धरन् प्रधानमन्त्री अवदत् यत् गुरुनानक देवस्य सिद्धान्ताः तस्य जीवनस्य अभिन्नाङ्गभूताः सन्ति। श्रीमोदी अकथयत् यत् भारतस्य इतिहासस्य कठिनतमेषु कालेषु अपि सिक्ख-गुरवः राष्ट्र-रक्षायाः सांस्कृतिक अस्मितायाः च दीपशिखां सजीवं व्यस्थापयन्।

राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च प्रकाश-पर्वणः अवसरे देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः

सिक्ख धर्मस्य संस्थापकस्य श्रीगुरु नानक देवस्य सप्तपञ्चाशदधिक-पञ्चशततमं प्रकाश-पर्व गतदिवसे समग्रे देशे विदेशेषु च पूर्ण-धार्मिक उत्साहेन सह आचरितम्। गुरु-साहिबस्य जन्म उनसप्तत्यधिक-चतुर्दशशततमे वर्षे कार्तिक-मासस्य पूर्णिमा-तिथौ पितुः मेहता-कालू-महोदयस्य मातुः तृप्ता-देव्याश्च गृहे राय-भोई-की-तलवण्डी-स्थले अभवत्, सम्प्रति लाहौर नगरे ननकाना-साहिब इति नाम्ना ज्ञायते। राष्ट्रपतिः द्रौपदी-मुर्मूः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी च प्रकाश-पर्वणः अवसरे देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः। श्रीगुरु नानक देव-महोदयः एक ओङ्कार अर्थात् एकः ईश्वरः इति सन्देशं दत्तवान्, जातिवाद-सदृशाणां सामाजिक-कुरीतीनां विरोधम् अकरोत्, अथ च सर्वे मानवाः समानाः सन्ति इति विषये बलं प्रादात्। अस्मिन पावनावसरे प्रातः कालादेव देशस्य विविध-गुरुद्वारा इत्यत्र बृहत् सङ्ख्यायां श्रद्धालवः नतमस्तकाः अभवन्। पञ्जाब-राज्यस्य सुल्तानपुर लोधी-स्थे गुरुद्वारा-बेर-साहिब इत्यत्र, यत्र गुरु-साहिबः चतुर्दश वर्षाणि, नव-मासान, त्रयोदश-दिनानि यावत् तपस्याम् अकरोत् अथ च अमृतसर-नगरस्य श्रीहरमन्दिर साहिब सहितम् अन्येषु गुरुद्वारास्थलेषु कीर्तन-दरबारस्य गुरबाणी-विचारस्य च आयोजनैः समग्रं वातावरणं भजन-कीर्तनैः गुञ्जितं वर्तते। श्रद्धालूनां मुखमण्डलेषु ईश्वरेण सह संयोगस्य आन्तरिकः आनन्दः स्पष्टतया दृश्यते। विविध स्थानेषु लङ्गर अर्थात् सामुदायिक-भोजनशालाः अपि प्रचलन्ति। सिक्ख तीर्थयात्रिणाम् एकं प्रतिनिधिमण्डलम् अपि दर्शनार्थं सम्प्रति पाकिस्तान-देशे स्थिते श्रीगुरु नानकदेवस्य जन्मस्थले गुरुद्वारा श्रीननकाना-साहिब इत्यत्र प्राप्तम्। सायङ्काले श्रीहरमन्दिर साहिब इत्यत्र अन्येषु च गुरुद्वारेषु दीपमाला-कार्यक्रमः अपि आयोजितः।

नेपाल-देशे पञ्च-दशांशोत्तर-षट् तीव्रतामानेन भूकम्पः आगतः, सिक्किम-उत्तरबङ्गल बिहार-क्षेत्रेष्वपि अनुभूतं कम्पनम्।

नेपाल-तिब्बत-सीम्नः समीपे ताप्लेजुङ्ग मण्डलस्य ओलाङ्चुङ्गणोला-क्षेत्रस्य पार्श्वे स्थानीय-परिमाण-मापदण्डे पञ्च-दशांशोत्तर-षट् तीव्रतामानेन भूकम्पः आगतः। नेपालस्य राष्ट्रिय-भूकम्प-अनुश्रवण-एवम- अनुसन्धान केन्द्रस्य अनुसारम् अयं भूकम्पः स्थानीय समयानुसारं प्रातः सप्तदशाधिक-सप्तवादने सञ्जातः। अस्य कम्पनं समीपस्थेषु सिक्किम राज्ये, उत्तर-बङ्गाले, बिहारराज्ये इत्यादिष्वपि अनुभूतम्। तथापि, एतावता कापि जनहानिः न सूचिता अस्ति।

सुभाषितम्

अणोरणीयानहमेव तद्वत् महानहं विश्वमिदं विचित्रम्।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्यमयोऽहं शिवरूपमस्मि।।
(कैवल्योपनिषद्- २०

अर्थात्- मैं (अद्वैत ब्रह्म) अणु से भी अणु हूँ, इसी प्रकार मैं महान् से भी महान् हूँ, यह विचित्र विश्व मेरा ही स्वरूप है, मैं ही पुरातन पुरुष हूँ, मैं ही ईश्वर हूँ, मैं ही हिरण्यमय पुरुष हूँ, मैं ही शिवस्वरूप हूँ।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकमण्डलः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा, प्रचारणणः- जगदीश डामी गुजरातम्, बृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साळवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

सप्तपञ्चाशत्तमस्य भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य पञ्चमे दिवसे चलच्चित्राणां, विचार-विमर्शानां, प्रशिक्षण-सत्राणां च विविध-सङ्गमो दर्शिष्यते



भारतस्य सप्तपञ्चाशत्तमस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य पञ्चमे दिने चलच्चित्राणां, चर्चायाः, शिक्षण-सत्राणां च आयोजनं भविष्यति। अस्मिन् कार्यक्रमे वैश्विक चलच्चित्रेषु महिलानां योगदानस्य विषये समूह-परिचर्चा अन्तर्भवति। रोमानियादेशस्य चलच्चित्रनिर्माता बोगदान मुरेसानु इत्येषः अपि यथार्थतायाः कल्पितकथायाः च मध्ये सूक्ष्मरेखायाः विषये एकं विशिष्टं सत्रम् आयोजितवान्। अस्मिन् दिने विंशतितमं वेव्स चलचित्र-आपणं अपि पिहितं भविष्यति, यस्मिन् उदयोन्मुखलेखकेभ्यः चलच्चित्रनिर्मातृभ्यः च अधिकाः अवसराः निर्मीयन्ते।

समग्रे देशे देव-दीपावली अथ कार्तिक पूर्णिमा-पर्व धार्मिक श्रद्धया उत्साहेन च समाचरितम्



वाराणस्यां कार्तिकपूर्णिमायाः शुभावसरे देव-दीपावलीति भव्यः उत्सवः आचरितः। राज्यसर्वकारेण उत्सवस्य कृते विस्तृता व्यवस्था कृता अस्ति। गङ्गायाः पार्श्वस्थेषु घाट-क्षेत्रेषु, तडागेषु, जलाशयेषु, नदीपारं स्थितेषु वालुकामय-क्षेत्रेषु च एकादश-लक्षतोप्यधिकाः मृत्तिका-दीपाः प्रकाशिताः। सम्पूर्ण नगरे प्रमुखानि भवनानि वर्णरञ्जितैः विद्युद्दीपैः अलङ्कृतानि । अस्य वर्षस्य उत्सवे शताधिकद्विसहस्र यावत् देशीयाः ड्रोन्स, लेज़र शो, अग्न्यस्त्राणि च दृश्यन्ते, येन पारम्परिके उत्सवे विशेष आकर्षणं भवति। पुष्कर-तालाब इत्यत्र काशी-नगरस्य महापुरुषाणां स्मृत्यर्थं शताधिकद्विसहसं यावत् दीपाः प्रज्वाल्यन्ते। भक्तानां सुरक्षायै, सुगम-यातायाताय, उत्सवानां दर्शनार्थं घट्ट-क्षेत्रे सुगम-प्रवेशाय च विशेष-व्यवस्था कृता अस्ति। मान्यतानुसारं कार्तिकपूर्णिमायां दीपप्रज्वालनेन मृतात्मनां शान्तिर्भवति ।

भारतं तन्त्रज्ञानस्य उपभोक्तृपदात् तन्त्रज्ञानस्य निर्मातृपदम् अवाप्नोत् - ज्योतिरादित्य-सिन्धिया



केन्द्रीय-सञ्चार मन्त्री ज्योतिरादित्य सिन्धिया अवदत् यत् भारतं तन्त्रज्ञानस्य उपभोक्तृपदात् तन्त्रज्ञानस्य निर्मातृपदम् अवाप्नोत्। नवदिल्ली-नगरे ऐषमः दूरसञ्चार-स्टार्ट-अप अथ एम.एस.एमई. सम्मेलनं सम्बोधयन् मन्त्री एतत् उक्तवान् श्रीसिन्धिया अवदत् यत् भारतं चतुर्दशाधिक-द्विसहस्रतमे वर्षे केवलं कतिपयेषु शतं यावत् स्टार्ट-अप् इत्येतेभ्यः अधुना द्विलक्षं यावत् स्टार्ट-अप् इत्येतान् अतिक्रम्य वर्धमानम् अस्ति। सः अवदत् यत्, चतुर्दशाधिक-द्विसहस्रतमे वर्षे केवलं पञ्चविंशतिकोटि अन्तर्जाल-सम्पर्कस्य अपेक्षया सम्प्रति देशे शतकोटि-अन्तर्जाल-सम्पर्कः अस्ति ।

सप्तविंशत्यधिक-द्विसहस्रतमस्य पञ्जाब-विधानसभा-निर्वाचनात् प्राक् भारतीय-जनता-पार्टीति दलं शिरोमणि अकाली-दलं च स्वकीयस्य गठबन्धनस्य घोषणां कृतवन्तौ

भाजपा-शिरोमणि अकालीदलं च आगामिनि सप्तविंशत्यधिक द्विसहस्रतमे वर्षे पञ्जाब-विधानसभायाः निर्वाचने मिलित्वा स्पर्धिष्यतः। नवदिल्ली-नगरस्य भाजपा-मुख्यालये गठबन्धनस्य घोषणां कुर्वन् भाजपा-दलस्य वरिष्ठः नेता अथ गृहमन्त्री अमितशाहः अवदत् यत् उभयोः दलयोः वरिष्ठ-नेतारः मिलित्वा आगामि-पञ्जाब-विधानसभा-निर्वाचने संयुक्तरूपेण स्पर्धिष्यन्ते इति निर्णयम् अकुर्वन् । सः आत्मविश्वासं प्रकटितवान् यत् पञ्जाब-विधानसभा-निर्वाचने एन.डी.ए. सत्तां प्राप्स्यति, अथ च एतत् गठबन्धनं हिन्दू-सिक्ख भ्रातृत्वस्य प्रतीकं भविष्यति । पञ्जाबराज्ये मादकद्रव्याणां भ्रष्टाचारस्य च उन्मूलनं सर्वोच्चा प्राथमिकता भविष्यति इति श्रीशाहः अवदत् । गृहमन्त्रिणा उक्तं यत् एन डी.ए.-सङ्घटनस्य प्राचीनतमस्य सहयोगिनः शिरोमणि अकाली दलस्य पुनः एन.डी.ए.-गठबन्धने प्रत्यागमनम् इति आनन्दस्य विषयः अस्ति ।



प्रधानमन्त्री नरेन्द्रमोदी शिरोमणि अकाली दलस्य राष्ट्रिय-जनतान्त्रिक गठबन्धने पुनः आगमने प्रसन्नतां प्रकटितवान। एकस्मिन् सामाजिक-पटलीय-सन्देशे श्रीमोदी अवोचत् यत् एतत् स्वाभाविकं गठबन्धनम् अस्ति, एतत् सुनिश्चितं करिष्यति यत् पञ्जाबराज्यं जन-हितैषि-शासनं प्राप्नुयात्, सहैव इदं राज्यं प्रगतेः नूतन-शिखराणि प्रति नेष्यति।

यूक्रेनयुद्धे रूसदेशस्य सप्तलक्षाधिकाः सैनिकाः हताः अथवा लुप्ताः



हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मास्को, यूक्रेनदेशेन सह प्रचलति दीर्घकालीनयुद्धे रूसदेशस्य सैनिकहानिः निरन्तरं वर्धमाना अस्ति। अद्यावधि अस्मिन् युद्धे रूसस्य सप्तलक्षाधिकाः सैनिकाः मृताः अथवा लुप्ताः इति द्वयोः सञ्चारसंस्थानयोः मेडूजा तथा मीडियाजोना संयुक्तानुसन्धानात् ज्ञातम्। एषा संख्या रूसस्य सर्वकारीयाभिलेखेषु उल्लिखित-मृतकसैनिकानां संख्यायाः अपेक्षया प्रायः द्विगुणिता अस्ति। उभयोः संस्थयोः मते, यूक्रेनसमर्थकयोः हॅकर्ससमूहयोः प्राप्तानां सर्वकारीयदत्तांशानाम् आधारेण एषा गणना कृता अस्ति। रूसदेशस्य राष्ट्रपतिः व्लादिमीर पुतिनः युद्धे मृतानां सैनिकानां स्थानपूर्तये प्रतिवर्षं चतुर्लक्षाधिकान् नवीनसैनिकान् सेनायां नियोजयति। नवीनसैनिकानां नियुक्त्यर्थं च तेषां कृते विशालधनराशेः प्रलोभनमपि दीयते। रूसस्य सर्वकारीयाभिलेखानुसारं सितम्बरमासपर्यन्तं युद्धे न्यूनातिन्यूनं चतुर्लक्षनवतिसहस्राणि (४,९०,०००) सैनिकाः मृताः आसन्। किन्तु सर्वकारीयदत्तांशेषु सैनिकमृत्यूनां विवरणं विलम्बेन अभिलिख्यते। अतः २०२६ तमे वर्षे मृतानां बहूनां सैनिकानां नामानि अद्यापि तेषु अभिलेखेषु समाविष्टानि न सन्ति। मेडूजा तथा मीडियाजोना इति संस्थाभ्यां वैज्ञानिकपद्धत्या दत्तांशानां विश्लेषणं कृत्वा एषः भेदः ज्ञातः। अस्मिन् विश्लेषणे ते सैनिकाः अपि अन्तर्भाविताः सन्ति, ये लुप्ताः सन्ति तथा येषां मृत्युः सम्भाव्यते। उभाभ्यां संस्थाभ्याम् अनुमानितं यत् यदि सर्वे मृत्यवः समये एव सर्वकारीयाभिलेखेषु पञ्जीकृताः अभविष्यन्, तर्हि मृतसैनिकानां कुलसंख्या सप्तलक्षात् अधिका अभविष्यत्। विशेषज्ञानां मते रूसदेशः यावन्तः सैनिकाः सेनायां नियोजयति, ततोऽपि अधिकाः सैनिकाः युद्धे हताः भवन्ति। तथापि निरन्तरं नवीनसैनिकानां नियुक्त्या रूसदेशः युद्धं निरन्तरं प्रवर्तयितुं समर्थः अभवत्। २०२६ तमे वर्षे अपि रूसदेशः प्रायः चतुर्लक्षनवसहस्राणि (४,०९,०००) नवीनसैनिकान् सेनायां नियोजयितुं प्रयतते। एतदर्थं शासनं नवीनसैनिकेभ्यः आकर्षक- धनराशिं प्रदातुं प्रस्तावान् अपि प्रस्तुतं करोति। निरन्तरसैनिकनियुक्तेः कारणेन महती सैनिकहानिः सञ्जाता अपि रूसदेशः युद्धं निरन्तरं प्रवर्तयति। तथापि अस्य परिणामेन भविष्ये युद्धक्षेत्रे तस्य आक्रमणक्षमता प्रभाविता भवितुम् अर्हति। विशेषतः पर्याप्तानां प्रशिक्षितानां पादातिसैनिकानाम् अभावः भविष्ये रूसस्य कृते गम्भीरां समस्यां जनयितुं शक्नोति। अतः यूक्रेनयुद्धे रूसस्य सैनिकहानिः, नवीनसैनिकनियुक्तिः, युद्धस्य च भावी दिशा इत्येते विषयाः अन्ताराष्ट्रियस्तरे गम्भीरचर्चायाः विषयाः अभवन्।

IGMC शिमला-मध्ये रोबोटिक-शल्यक्रिया

महार्घा जाता, अधुना सामान्यकक्षे दातव्यानि भविष्यन्ति 60 सहस्ररुप्यकाणि



हिमसंस्कृतवार्ता - शिमलाइन्दिरागान्धी-आयुर्विज्ञानमहाविद्यालये चिकित्सालये च (IGMC) रोबोटिक-शल्यक्रिया महार्घा जाता अस्ति। अधुना सामान्यकक्षस्य (जनरल वार्ड) रोगिभ्यः ६०,००० रूप्यकाणि तथा निजीकक्षे (प्राइवेट वार्ड) प्रविष्टेभ्यः रोगिभ्यः ८०,००० रूप्यकाणि दातव्यानि भविष्यन्ति। चिकित्सालयप्रबन्धनस्य पक्षतः नूतनाः दराः तत्क्षणप्रभावेण क्रियान्विताः कृताः सन्ति। रोबोटिक-शल्यक्रियायाः दरान् वर्धयितुं रोगीकल्याणसमितेः सभायां निर्णयः गृहीतः आसीत्। तदनन्तरं शुल्कं वर्धयितुं सर्वकाराय पत्रं प्रेषितम् आसीत्। पत्रे प्राप्ते सति चिकित्सालयप्रबन्धनेन रोबोटिक-शल्यक्रियायाः शुल्कं वर्धितम् अस्ति। अस्य प्रत्यक्षः प्रभावः रोगिणां कोषे पतिष्यति। चिकित्सालये इदानीं यावत् शल्यक्रिया-स्त्रीरोग- (गायनी), शिशुरोगविभागानां पक्षतः रोबोटिक-शल्यक्रिया क्रियते। अतः पूर्वं रोबोटिक-शल्यक्रियायाः सामान्यकक्षे प्रविष्टेभ्यः रोगिभ्यः ३०,००० रूप्यकाणि निजीकक्षं स्वीकुर्वद्भ्यः च ५०,००० रूप्यकाणि दातव्यानि आसन्, किन्तु अधुना उभयोः कक्षयोः प्रविष्टेभ्यः रोगिभ्यः ३०,०००-३०,००० रूप्यकाणां वृद्धिः कृता अस्ति। रोबोटिक-शल्यक्रियायाः शुल्कं वर्धयितुं कार्यालय-आदेशाः चिकित्साधीक्षकेण निर्गताः सन्ति।

क्ष-किरणपरीक्षायाः (एक्स-रे) अपि दातव्यं भविष्यति धनम्

IGMC-मध्ये अधुना क्ष-किरणपरीक्षां (एक्स-रे) कारयितॄणां रोगिणां कोषः अपि शिथिलः भविष्यति। इदानीं यावत् निःशुल्कं क्रियमाणायाः एक्स-रे-परीक्षायाः चिकित्सालयप्रबन्धनं धनं ग्रहीष्यति। एतत् शुल्कं ३१ दिसम्बर् २०२० दिनाङ्के निर्गतस्य पत्रस्य आधारेण गृहीष्यते। अनेन अपि रोगिणः कोषे अतिरिक्तः भारः पतिष्यति। अयं निर्णयः अपि रोगीकल्याणसमितेः सभायां गृहीतः आसीत्।

१५० तः अधिकाः जाताः रोबोटिक-शल्यक्रियाः

इन्दिरागान्धी-आयुर्विज्ञानमहाविद्यालये चिकित्सालये च १५० तः अधिकाः रोबोटिक-शल्यक्रियाः जाताः सन्ति। तदनन्तरं दराः वर्धिताः सन्ति। सुपर-स्पेशलिटी-चिकित्सालये चमियाना-स्थाने अपि १५० तः अधिकाः रोबोटिक-शल्यक्रियाः जातासु सत्सु दराः वर्धिताः आसन्। अस्य प्रत्यक्षः प्रभावः रोगिषु पतितः अस्ति। IGMC-मध्ये शल्यक्रियाविभागस्य पक्षतः सर्वप्रथमं रोबोटिक-शल्यक्रिया आरब्धा आसीत्।

हिमाचलस्य मार्गेषु वर्षद्वये २३९९ मृत्यूः, ऊनामण्डले सर्वाधिकाः दुर्घटनाः, काङ्गड़ामण्डले गताः सर्वतोऽधिकाः प्राणाः



सांकेतिकं चित्रम्

हिमसंस्कृतवार्ता - शिमला।

चतुर्विंशतिमासेषु अर्थात् वर्षद्वये हिमाचले मार्गेष्वेव प्रायः २४०० जनानां प्राणहानिः अभवत्। अस्मिन् अवधौ अत्र २६०९ लघ्व्यः बृहत्यश्च मार्गदुर्घटनाः अभवन्। सर्वतोऽधिकाः ३८३ मृत्यूः काङ्गड़ामण्डले पञ्जीकृताः। ऊनामण्डले ३३९ जनाः दुर्घटनानां बलिम् अभवन्। शिमलामण्डले ३३६ अमूल्याः श्वासाः दुर्घटनासु सर्वदा सर्वदा च अवरुद्धाः अभवन्। हिमाचलप्रदेशे वर्षद्वयस्य अन्तराले (नवम्बर् २०२६ यावत्) आहत्य २६०९ मार्गदुर्घटनाः अभवन्। एतासु दुर्घटनासु २३९९ जनाः प्राणान् अजहन् (प्राणहानिम् प्राप्नुवन्)। सर्वतोऽधिकाः मार्गदुर्घटनाः ऊनामण्डले अभवन्। अत्र आहत्य ५५७ मार्गदुर्घटनाः अभवन्, यासु ३३९ जनाः प्राणान् अजहन्। तदनन्तरं काङ्गड़ामण्डले ४०९ मार्गदुर्घटनाः अभवन्। अत्र सर्वतोऽधिका जनहानिः अभवत्। काङ्गड़ामण्डले ३८३ जनानां मृत्युः अभवत्। शिमलामण्डले ३८१ दुर्घटनासु ३३६ जनानां मृत्युः अभवत्। सोलनमण्डले दुर्घटनानां सङ्ख्या २५५ आसीत्, मृत्युकल्पः अपि २५५ एवासीत्। मण्डीमण्डले वर्षद्वये २३७ मार्गदुर्घटनासु २४९ जनानां मृत्युः अभवत्।हमीरपुरमण्डले १६४ मार्गदुर्घटनासु ६४ जनानां मृत्युः अभवत्। चम्बामण्डले १४६ मार्गदुर्घटनाः अभवन्। एतासु २१० जनानां प्राणाः गताः। कुल्लू मण्डले दुर्घटनानां सङ्ख्या १२७ आसीत्। अत्र १४२ जनाः स्वप्राणान् त्यक्तवन्तः। बिलासपुरमण्डले १२५ मार्गदुर्घटनासु ९५ जनानां प्राणाः गताः। लाहौल-स्पीति-मण्डले ९७ दुर्घटनासु ४४ जनानां मृत्युः अभवत्। किन्नौरमण्डले ५८ दुर्घटनासु ७३ जनाः प्राणान् अजहन्। सिरमौरमण्डले ५३ मार्गदुर्घटनासु २०९ जनानां प्राणाः गताः। सिरमौरमण्डले तु २०२६ तमस्य वर्षस्य आरम्भः एव महता कष्टकरेण दुर्घटनाया अभवत्। अत्र हरिपुरधारे निजी-बस-दुर्घटनायां १४ जनानां प्राणाः गताः आसन्। पर्वतीयराज्ये मार्गदुर्घटनानां कारणं सङ्कीर्णाः मार्गाः गभीराः गर्ताश्च सन्ति। अत्र याने गभीरे गर्ते पतिते सति जनहान्याः सम्भावना अधिका भवति। सम्प्रति एव मण्डीमण्डलस्य जोगिन्दरनगरस्य लड़भड़ोल-क्षेत्रे मार्गदुर्घटनायां षण्णां बालकानां मृत्युः अभवत्। दृष्टं यत् समतल-मण्डलानां अपेक्षया पर्वतीय-मण्डलेषु अधिकाः मृत्यूः भवन्ति।

गुरुनानकदेववर्यस्य प्रकाशपर्वणि जयरामठाकुरः गुरुद्वारासाहिबे मस्तकं नतवान्



हिमसंस्कृतवार्ता — शिमला।

प्रतिपक्षनेता जयरामठाकुरः सिखधर्मस्य संस्थापकस्य प्रथमगुरुवर्यस्य पूज्यस्य गुरुनानकदेवस्य ५५७ तमे प्रकाशपर्वणः पावन-अवसरे स्थानीये बस-स्थानके स्थिते गुरुद्वारासाहिबे प्राप्य मस्तकं नतवान् गुरुचरणयोः शीशं च अवनमयत्। अस्मिन् अवसरे सः प्रदेशवासिनां सुख-शान्ति-समृद्धि-कुशलतानां कामनां कुर्वन् प्रार्थनां कृतवान्। जयरामठाकुरः अवदत् यत् गुरुनानकदेवस्य सम्पूर्णं जीवनं तस्य शिक्षाश्च मानवतायाः कृते अमूल्या निधिः वर्तन्ते। तेन 'एक ओंकार', सेवा, सत्यता, समता, भ्रातृभावस्य च सन्देशं दत्वा समाजं भेदभावात् उच्च-नीच-भावाच्च उपरि उत्थाय मानवतायाः मार्गे चलितुं प्रेरणा दत्ता। तस्य जीवनम् अस्मान् शिक्षयति यत् सत्या भक्तिः मानवसेवायां, परोपकारे, सर्वेषां प्रति प्रेम-सम्मानयोः भावे च निहिता अस्ति। गुरुनानकदेवस्य विचाराः आदर्शाश्च अद्यापि तावदेव प्रासङ्गिकाः सन्ति, आगमिष्यन्तीः सन्ततीः च सर्वदा प्रेरयिष्यन्ति।

हिमाचल-भाजपा-कोर-समितौ महद्-परिवर्तनम् जे. पी. नड्डा-, जयरामठाकुर-सहिताः १२ सदस्याः सूच्यां समाविष्टाः, अनेके दिग्गजाः बहिष्कृताः



हिमसंस्कृतवार्ता - शिमला।
हिमाचलप्रदेश-भाजपा-दलस्य नवीन-कोर-समितेः सङ्घटनेन दलस्य सङ्घटनात्मक-संरचनायां महत् परिवर्तनं जातम्। दीर्घकालात् प्रदेश-भाजपा-राजनीत्याम् अहं भूमिकां निर्वहन्तः अनेके वरिष्ठाः नेतारः नवीनायां समितौ स्थानं न प्राप्तवन्तः। पूर्व-मुख्यमन्त्री प्रेमकुमारधूमलः शांताकुमारश्च इत्यादयः दलस्य दिग्गजनायकाः अपि कोर-समित्याः बहिष्कृताः। एतदतिरिच्य, राज्यसभासांसद् हर्षमहाजनः, रणधीरशर्मा, राजीवसहजलश्च इत्यादयः अनेके पुरातनाः अपि अस्मिन्क्रमे निष्कासिताः। भाजपा-दलेन पुरातना २१-सदस्यीया कोर-समितिः पुनर्संरच्य अधुना १२-सदस्यीया कृता। राष्ट्रियाध्यक्षस्य नितिननवीनस्य आदेशानुसारं प्रदेश-भाजपा-अध्यक्षेण डॉ. राजीवबिन्दलेन नवीनायाः समित्याः अधिसूचना निर्गता।

समितौ एते नेतारः समाविष्टाः

नवीनायां सूच्यां केन्द्रीय-नेतृत्वेन सम्बद्धाः नेतारः, प्रदेश-सङ्घटनस्य प्रमुखाः अधिकारिणः, सांसदाः, विधायकाश्च समाविष्टाः। नवीनायां कोर-समितौ केन्द्रीयमन्त्री पूर्व-राष्ट्रीय-अध्यक्षश्च जगतप्रकाशनड्डा, प्रतिपक्षनेता पूर्व-मुख्यमन्त्री च जयरामठाकुरः, प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः, प्रदेश-महामन्त्री-सङ्गठनः सिद्धार्थनश्च स्थानं प्राप्तवन्तः। एतेभ्यः ऋते, सांसद् अनुरागठाकुरः, सुरेशकश्यपः, डॉ. राजीवभारद्वाजः, विधायकः पूर्व-प्रदेशाध्यक्षश्च सतपालसिंहसत्ती, पूर्व-विधानसभाध्यक्षः विधायकश्च विपिनसिंहपरमारः, राज्यसभासांसद् डॉ. सिकन्दरकुमारः, प्रदेश-महामन्त्री पायलवैद्यः, सञ्जीवकटवालश्च सदस्याः कृताः। प्रदेश-भाजपा-प्रभारी श्रीकान्तशर्मा, सह-प्रभारी दर्शनासिंहश्च विशेष-आमन्त्रित-सदस्यरूपेण समाविष्टौ। एवमस्यां समितौ १२ नियमित-सदस्येभ्यः ऋते द्वौ विशेष-आमन्त्रित-सदस्यौ भविष्यतः।

पुरातन-समित्याः अनेके प्रभावशालिनः नेतारः बहिः

नवीनायां कोर-समितौ सर्वतोऽधिका चर्चा पूर्व-मुख्यमन्त्रिणः प्रेमकुमारधूमलस्य शांताकुमारस्य च स्थानं न प्राप्तेः वर्तते। एतेभ्यः ऋते, राज्यसभासांसद् हर्षमहाजनः, विधायकः रणधीरशर्मा, पूर्वमन्त्री राजीवसहजलः, विधायकौ राकेशजमवाल-त्रिलोकजमवालौ च नवीनायाः समित्याः अङ्गं न भविष्यन्ति। पुरातन-समितौ समाविष्टाः त्रिलोककपूरः, बिहारीलालशर्मा, पूर्वसांसद् सुरेशचन्देलः इत्येतेषाम् नामानि अपि नवीनायाः सूच्याः बहिः सन्ति।

सङ्घटनात्मक-समीकरणेषु परिवर्तनस्य सङ्केतः

कोर-समितिः भाजपा-दलस्य प्रदेश-घटके महत्त्वपूर्ण-नीतिगत-सङ्घटनात्मक-निर्णयानां कृते प्रमुखं मञ्चं मन्यते। एतादृश्याम् अवस्थायां वरिष्ठनेतॄन् बहिः स्थापयितुं समित्याः आकारं लघु कर्तुं च दलस्य सङ्घटनात्मक-समीकरणेषु महतः परिवर्तनस्य रूपेण दृश्यते।

हिमाचलस्य कृषकपुत्रस्य ऐतिहासिकी सिद्धिः

जयचौधरिणः 'जेडस्केलर'-संस्थायाः ४४-अर्बडॉलरपरिमिते मूल्ये 'क्राउडस्ट्राइक'-संस्थया सह अधिग्रहणसन्धिः



नवदेहली / शिमला, दिनाङ्कः - २५ नवम्बर २०२६। हिमाचलप्रदेशस्य ऊनामण्डलान्तर्गतस्य पनौहनामकस्य लघुग्रामस्य एकस्मिन् सामान्यकृषकपरिवारे जातः जयचौधरी स्वस्य अनवरतपरिश्रमेण, दूरदृष्ट्या, दृढसङ्कल्पेन च वैश्विकप्रौद्योगिकीक्षेत्रे ऐतिहासिकं स्थानं प्राप्तवान् अस्ति। तेन संस्थापिता मेघसुरक्षासंस्था (Cloud Security Company) 'जेडस्केलर' (Zscaler) अधुना प्रायः ४४-अर्बडॉलरपरिमितस्य (४३.९ अर्बडॉलर) ऐतिहासिकस्य अधिग्रहणानुबन्धस्य भागः भवितुं गच्छति। अमरीकादेशस्य प्रमुखा साइबर-सुरक्षासंस्था 'क्राउडस्ट्राइक' (CrowdStrike) पूर्ण-अंशाधारितव्यवहारे (All-stock deal) 'जेडस्केलर'-संस्थायाः अधिग्रहणाय सम्मतिं प्रकटितवती अस्ति। साइबर-सुरक्षोद्योगस्य इतिहासे अयं सर्वबृहत्सु अधिग्रहणव्यवहारेषु अन्यतमः वर्तते। अनया उपलब्ध्या न केवलं जयचौधरिणे अन्ताराष्ट्रियस्तरे नूतना ख्यातिः लब्धा, अपितु समग्रस्य हिमाचलप्रदेशस्य कृते अपि महान् गौरवस्य अवसरः समुत्पन्नः अस्ति।

अधिग्रहणानुबन्धस्य मुख्यबिन्दवः
घोषणा एवं मूल्यम्: २०२६ तमस्य वर्षस्य नवम्बरमासस्य २३ तमे दिनाङ्के क्राउडस्ट्राइक-संस्थया जेडस्केलर-संस्थायाः अधिग्रहणाय प्रायः ४३.९-अर्बडॉलरपरिमितस्य पूर्ण-अंशाधारितव्यवहारेण घोषणा कृता।

अंशविनिमयः (Share Exchange): अनुबन्धानुसारं जेडस्केलर-संस्थायाः अंशधारकाः स्वस्य प्रत्येकस्य अंशस्य (Share) विनिमये क्राउडस्ट्राइक-संस्थायाः १.१३५ अंशान् प्राप्स्यन्ति। अयं व्यवहारः २० नवम्बरदिनाङ्के निमीलितस्य जेडस्केलर-अंशमूल्यस्य अपेक्षया प्रायः ३४ प्रतिशतम् अधिकं मूल्यं दर्शयति।

स्वामित्वानुपातः: प्रस्तावितस्य व्यवहारस्य पूर्णतायाः अनन्तरं संयुक्तसंस्थायां क्राउडस्ट्राइक-संस्थायाः वर्तमान-अंशधारकाणां भागः प्रायः ८४.१ प्रतिशतं तथा च जेडस्केलर-संस्थायाः अंशधारकाणां भागः प्रायः १५.९ प्रतिशतं भविष्यति।

पनौहग्रामात् सिलिकॉन-वैली-पर्यन्तं प्रेरिका यात्रा

१९५८ तमे वर्षे हिमाचलप्रदेशस्य पनौहग्रामे एकस्मिन् साधारणकृषकपरिवारे जयचौधरिणः जन्म अभवत्। बाल्यकाले तस्य ग्रामे विद्युत्, नलद्वारा जलं चेत्यादीनि आधारभूतानि सौकर्याणि अपि न आसन्। सीमितासु सुविधासु अपि सः प्रतिदिनं प्रायः चत्वारि किलोमीटरमितं पद्भ्यां चलित्वा ग्रामान्तरं विद्यालयं गच्छति स्म, बहुवारं च वृक्षस्य अधः उपविश्य अध्ययनं करोति स्म। स्वप्रतिभया परिश्रमेण च सः वाराणसीस्थे भारतीयप्रौद्योगिकीसंस्थाने (IIT-BHU) विद्युदभियान्त्रिक्याः (Electrical Engineering) अध्ययनस्य अवसरं प्राप्तवान्। १९८० तमे वर्षे स्नातकपदवीं प्राप्य सः उच्चशिक्षार्थम् अमरीकादेशम् अगच्छत्, यत्र सः सङ्गणकाभि-यान्त्रिकी (Computer Engineering), औद्योगिक-अभियान्त्रिकी (Industrial Engineering), व्यवसायप्रबन्धनम् (MBA) चेत्यादिषु विषयेषु स्नातकोत्तरपदवीः अर्जितवान्।

कार्तिकपूर्णिमायां सुलतानगञ्जे श्रद्धालूनां महाजनसमागमः उत्तरवाहिन्यां गङ्गायां पञ्चाशत्सहस्राधिकैः श्रद्धालुभिः कृतं पवित्रस्नानम्, देवदीपावल्याः च भव्यायोजनम्

हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, सुलतानगञ्जम्

कार्तिकपूर्णिमायाः पावनावसरे बिहारराज्यस्य भागलपुरजनपदस्य सुलतानगञ्जे श्रद्धायाः भक्तेः च महाजनसमागमोऽभवत्। अस्मिन् अवसरे पञ्चाशत्सहस्राधिकाः श्रद्धालवः उत्तरवाहिन्यां गङ्गायां पुण्यस्नानम् अकुर्वन्, देवदीपावलीपर्व महता श्रद्धया उल्लासेन च समाचरन्। मङ्गलवासरे प्रातःकालादेव गङ्गाघाटेषु श्रद्धालूनां समागमः प्रारब्धः। केचन स्वपरिवारैः सह पुण्यस्नानार्थम् आगताः, अन्ये च सम्पूर्णमासपर्यन्तं प्रचलितस्य कार्तिकव्रतस्य समापनार्थम् उपस्थिताः अभवन्। गङ्गायाः पवित्रसलिलेषु दीपदानस्य दृश्यं तथा 'हर हर गङ्गे' इति जयघोषः सम्पूर्णम् अजगैवीनाथधाम भक्तिमयम् अकरोत्। अवसरे अस्मिन् पञ्चाशत्सहस्राधिकाः श्रद्धालवः उत्तरवाहिन्यां गङ्गायां श्रद्धया स्नानम् अकुर्वन्। स्नानानन्तरं ते विधिविधानपूर्वकं पूजाम् अर्चनां च कृत्वा स्वपरिवारस्य सुखसमृद्धेः कामनाम् अकुर्वन्। कार्तिकपूर्णिमया सह देवदीपावलीपर्व अपि श्रद्धया हर्षोल्लासेन च आचरितम् अभवत्। गङ्गाघाटेषु दीपदानस्य मनोरमं दृश्यं सर्वेषां आकर्षणस्य केन्द्रम् अभवत्। गङ्गायाः तरङ्गेषु प्रज्वलिताः दीपाः घाटानाम् आध्यात्मिक- सौन्दर्यं वर्धितवन्तः। श्रद्धालूनाम् आगमनक्रमः सोमवासरस्य सायंकालादेव प्रारब्धः आसीत्। भागलपुरात् अतिरिक्तं मुंगेर- लखीसराय- गया- जमुई- बाँकाजनपदेभ्यः, समीपस्थेभ्यः ग्रामीणक्षेत्रेभ्यः चापि बहुसंख्यकाः जनाः सुलतानगञ्जम् आगतवन्तः। मङ्गलवासरे प्रातःकाले घाटेषु जनसमूहः वर्धितः। स्नानस्य, पूजनस्य, दानपुण्यस्य दीपदानस्य च क्रमः दीर्घकालं यावत् प्राचलत्। सम्पूर्णे कार्तिकमासे प्रतिदिनं प्रातःकाले गङ्गास्नानं पूजनं च कुर्वतां व्रतीनां कृते एषा पूर्णिमा विशेषमहत्त्वं धारयति। मासपर्यन्तं धार्मिकानुष्ठानानि कुर्वन्तः व्रतिनः अस्मिन् दिने विशेषस्नानं कृत्वा स्वकीयस्य मासव्यापिनः व्रतस्य समापनम् अकुर्वन्। स्नानानन्तरं ते दीपदानम्, अन्नदानम् अन्यानि च धार्मिककर्माणि सम्पादितवन्तः। स्थानीयनिवासी पण्डितः अवदत् यत् कार्तिकपूर्णिमायां गङ्गास्नानस्य विशेषं धार्मिकमहत्त्वम् अस्ति।



धार्मिकमान्यतानुसारम् अस्मिन् दिने सर्वे देवाः देव्यश्च गङ्गायां निवसन्ति। अतः अस्मिन् पुण्यावसरे स्नानं, पूजनं, दीपदानं, दानपुण्यं च विशेषफलप्रदं मन्यते। तेन उक्तं यत् कार्तिकपूर्णिमायां देवदीपावलीपर्वणः अपि विशेषा परम्परा अस्ति। जाह्नवीगङ्गा-महाआरतीसभायाः महामन्त्री सञ्जीवझा सुलतानगञ्जवासिभ्यः आग्रहं कृतवान् यत् ते देवदीपावल्याः अवसरे स्वगृहेषु न्यूनातिन्यूनं दीपद्वयं प्रज्वालयेयुः। तेन कथितं यत् गृहाङ्गणे दीपप्रज्वालनेन पर्वणः आध्यात्मिकं पारम्परिकं च महत्त्वं प्रत्येकस्मिन् गृहे प्रसारितं भवति।

कार्तिकपूर्णिमायाः अवसरे अजगैवीनाथमन्दिरे अपि श्रद्धालूनां जनसम्मर्दः अभवत्। मन्दिरे दर्शनपूजनार्थं विशेषव्यवस्था कृता आसीत्। मन्दिरस्य स्थानापतिमहन्तः प्रेमानन्द-गिरिमहोदयः अवदत् यत् सम्भावितजनसमागमं दृष्ट्वा आवश्यकाः व्यवस्थाः पूर्वमेव कृताः आसन्। मङ्गलवासरे बहुसंख्यकाः भक्ताः बाबा-अजगैवीनाथस्य दर्शनं पूजनं च कृत्वा स्वकल्याणस्य कामनाम् अकुर्वन्।अस्मिन्नवसरे शतशः कांवडयात्रिणः उत्तरवाहिन्याः गङ्गायाः पवित्रं जलं कलशेषु गृहीत्वा पद्भ्यां बैद्यनाथधामं प्रति प्रस्थिताः। बिहार-झारखण्डप्रदेशाभ्यां तथा अन्येभ्यः क्षेत्रेभ्यः आगतानां कांवडयात्रिणां 'बोल बम' इति जयघोषेण गङ्गाघाटाः मन्दिरपरिसरश्च गुंजायमानः अभवत्। गङ्गास्नानं, मन्दिरदर्शनं, कांवडयात्रा सुलतानगञ्जस्य धार्मिक- परम्परायाः गङ्गया सह सम्बद्धां सांस्कृतिक- परिचितिं च प्रकाशयति। श्रद्धालूनां विशालं समागमं दृष्ट्वा गङ्गाघाटेषु अजगैवीनाथमन्दिरपरिसरे च आरक्षीप्रशासनेन समुचिता सुरक्षाव्यवस्था कृता आसीत्। विभिन्नेषु स्थानेषु आरक्षकाः नियोजिताः आसन्। ते श्रद्धालूनाम् आवागमनं निरीक्षन्तः आसन्। प्रातःकालात् सायंकालपर्यन्तं गङ्गातटे जनानां समागमः अविच्छिन्नरूपेण प्रचलितः आसीत्। एवं कार्तिकपूर्णिमायाः महोत्सवेन सुलतानगञ्जस्य धार्मिकं सांस्कृतिकं च वैशिष्ट्यं पुनरेकवारं प्रकाशितम्। मासव्यापि- कार्तिकव्रतस्य समापनानन्तरं श्रद्धालवः हृदि भक्तिभावं गृहीत्वा स्वगृहाणि प्रत्यागच्छन्।



भग्नमार्गेभ्यः जलप्लावन-समस्यायाश्च मुक्तेः उपायः : नगरनिगमेन १२-कोटि-रूप्यकाणां व्ययेन २७ निर्माणकार्याणि कारयिष्यन्ते

गोरखपुरम्, दिनाङ्कः - २५ नवम्बर २०२६

नगरवासिनः भग्नमार्गेभ्यः जलप्लावनस्य समस्यायाश्च मोचयितुं नगरनिगमेन अवस्थापनाविकासनिधितः प्रायः १२-कोटिरूप्यकाणां व्ययेन २७ निर्माणकार्याणि कारयिष्यन्ते। अस्यां योजनायां दृढचूर्णमार्गाणां (CC Roads), प्रबलित-सीमेंट-कङ्क्रीट-जलप्रणालिकानां (RCC Drains), बृहत्-जलप्रणालिकानां च निर्माणेन सह तप्तमिश्रितमार्गाणाम् (Hotmix Roads) उद्यानानां च सौन्दर्यीकरणम् अपि सम्मिलितम् अस्ति। महापौरस्य डॉ. मङ्गलेशश्रीवास्तवस्य अध्यक्षतायां संपन्नायाम् उपवेशने अस्याः योजनायाः अनुमोदनं जातम्।

बह्वषु उपनगरेषु सुलभः भविष्यति आवागमनमार्गः

नगरस्य बडगो, लच्छीपुर, बेतियाहाता, गायघाट, गोरखनाथमन्दिरस्य पृष्ठभागे स्थिताः वीथ्यः, शाहपुर, शक्तिनगर, उर्वरकनगर, बन्धूसिंहनगर, महर्षिदधीचिनगर, साकेतनगर, शिवाजीनगर, राप्तीनगर, बरगदवा, रामनगर चेत्यादिषु क्षेत्रेषु दृढचूर्णमार्गाणां (CC Roads) प्रबलित-जलप्रणालिकानां च निर्माणं भविष्यति। एतेन सह आवागमनं सुगमं भविष्यति तथा च जलनिष्कासनव्यवस्था अपि श्रेष्ठा भविष्यति।

अष्टसु स्थानेषु बृहत्-जलप्रणालिकानां निर्माणम्

जलनिष्कासनव्यवस्थां सुदृढां कर्तुं लालडिग्गीचतुष्पथम्, महात्माज्योतिबाफुलेनगरम्, कल्याणपुरम्, विजयचतुष्पथम्, आत्मारामनगरम्, मायाविपणिः (माया बाजार), कृष्णमोहनपाण्डेयनगरम्, चन्द्रशेखराजादचतुष्पथम् चेत्येतेषु अष्टसु स्थानेषु बृहत्-जलप्रणालिकाः निर्मीयन्ते। अपि च द्वारिकापुरी-उपनगरद्वारात् तुरहाबारी-शिवमन्दिरपर्यन्तं तप्तमिश्रितयन्त्रेण (Hotmix Plant) मार्गस्य पार्श्वपथस्य च निर्माणं भविष्यति। गिरधरगञ्जे मार्ग-जलप्रणालिकानिर्माणेन सह उद्यानस्य सौन्दर्यीकरणम् अपि कारयिष्यते।

विद्यापतिस्मृति- पर्वसमारोहे बालमेला- विजेतारः सम्मानिताः,

प्रो. देवशङ्करनवीनाय 'यात्री चेतना सम्मानः' प्रदत्तः

लेखनप्रतियोगितायाम् अयांशझा प्रथमः;

आनन्दमेला, हस्तकला- प्रदर्शनी, सांस्कृतिक- प्रस्तुतयश्च आकर्षणस्य केन्द्राणि

हिमसंस्कृतवार्ताः राघव नाथ झा, पटना

चेतनासमितेः, पटनायाः तत्त्वावधाने मिलर- विद्यालय-क्रीडाङ्गणे आयोजितस्य 'विद्यापतिस्मृति- पर्वसमारोहस्य-२०२६' द्वितीयदिने मिथिलायाः भाषा- साहित्य-संस्कृतीनां लोककलायाः पारम्परिक- भोजनानां च विविधाः छटाः दृष्टिगोचराः अभवन्। अस्मिन्नवसरे बालमेलायाः विभिन्न- प्रतियोगितानां विजेतारः बालकाः सम्मानिताः। साहित्यसंस्कृतिक्षेत्रयोः विशिष्टयोगदानाय जवाहरलालनेहरू- विश्वविद्यालयस्य (जे. एन. यू.) प्राध्यापकः डॉ. देवशङ्करनवीनः प्रतिष्ठितेन 'यात्री चेतना सम्मानम्' इत्यनेन सम्मानितः।



बालमेलाविजेतृभ्यः मन्त्रिभिः पुरस्कारप्रदानम्

बालमेलायां आयोजितानां विभिन्न- प्रतियोगितानां विजेतृभ्यः बिहारसर्वकारस्य राजस्वभूमिसुधारमन्त्रिणा दिलीपकुमारजायसवालेन, भवननिर्माणमन्त्रिण्या लेशीसिंहेन, पूर्वमन्त्रिणा विधायकेन विनोदारायणझा-महोदयेन च संयुक्तरूपेण पुरस्काराः प्रदत्ताः।

पञ्चतः नववर्षपर्यन्तवयोगटस्य लेखनप्रतियोगितायाम् अयांशझा प्रथमस्थानं, दिव्यांशझा च द्वितीयस्थानं प्राप्तवान्। बालमेलायां पञ्चतः नववर्षपर्यन्तं दशतः पञ्चदशवर्षपर्यन्तं च वयोगटद्वये सामान्यज्ञानस्य, मैथिलीगीतस्य, चित्रकलायाः, लेखनस्य, श्रुतिलेखस्य च प्रतियोगिताः आयोजिताः। बालकैः उत्साहेन भागं गृहीत्वा स्वप्रतिभा प्रदर्शिता।



प्रतियोगितानां प्रमुखपरिणामाः-

प्रथमः वयोगटः (०५–०९ वर्षाणि)

लेखनम्- प्रथमः अयांशझा, द्वितीयः दिव्यांशझा।

सामान्यज्ञानम्- प्रथमा मान्याश्री, द्वितीयः शीर्षझा।

मैथिलीगीतम्- प्रथमा आर्याभारद्वाजः, द्वितीया नमीषः।

चित्रकला- प्रथमा मान्याश्री, द्वितीया आर्याभारद्वाजः।

द्वितीयः वयोगटः (१०–१५ वर्षाणि)

सामान्यज्ञानम्- प्रथमः आदित्यरायः, द्वितीया राधाराणी।मैथिलीगीतम्- प्रथमा आराध्यामिश्रा, द्वितीया हर्षिताझा।चित्रकला- प्रथमा आराध्यामिश्रा, द्वितीयः रुद्रांशतिवारी। श्रुतिलेखः- प्रथमः आदर्शझा, द्वितीया राधाराणी।

प्रो. देवशङ्करनवीनाय 'यात्री चेतना सम्मानः'

समारोहस्य विशेषाकर्षणम् आसीत् जवाहरलालनेहरू- विश्वविद्यालयस्य (जे. एन. यू.) प्राध्यापकस्य डॉ. देवशङ्करनवीनस्य सम्माननम्। साहित्यसंस्कृतिक्षेत्रयोः तस्य विशिष्टयोगदानाय बिहारसर्वकारस्य शिक्षामन्त्रिणा मिथिलेशतिवारिणा, पूर्वमन्त्रिणा विधायकेन विनोदारायणझा-महोदयेन च संयुक्तरूपेण तस्मै प्रतिष्ठितः 'यात्री चेतना सम्मानः' प्रदत्तः।

आनन्दमेलायां पारम्परिक-व्यञ्जनानाम् आस्वादः

मैथिलीमहिलासङ्घस्य तत्त्वावधाने आनन्दमेलायाः आयोजनम् अभवत्। अत्र मिथिलायाः पारम्परिकभोजनसम्बद्धाः प्रायः पञ्चविंशतिः आपणाः स्थापिताः। चूडम्, मत्स्यव्यञ्जनं, मखानक्षीरं, सकरौढी, छीका-पूआ, तिलकोरस्य तरुआ इत्यादीनां व्यञ्जनानाम् आगन्तुकैः आस्वादनं कृतम्। मेलायां मिथिलायाः समृद्धायाः पाकपरम्परायाः गृहसंस्कृतेश्च सजीवं दृश्यं दृष्टम्।

हस्तकलाप्रदर्शन्यां त्रिंशत् आपणानि

समारोहप्राङ्गणे हस्तकलाप्रदर्शनी-विक्रयकेन्द्रमपि आयोजितम्। तत्र प्रायः त्रिंशत्सु आपणेषु मिथिलायाः पारम्परिककलानां, हस्तशिल्पानां, चित्रकलायाः, गृहोपयोगिवस्तूनां च प्रदर्शनं विक्रयणं च अभवत्। स्थानीयकलाकारैः महिला- उद्यमिभिश्च निर्मिताः कलाकृतयः हस्तनिर्मितवस्तूनि च आगन्तुकानाम् आकर्षणस्य केन्द्राणि अभवन्।

सांस्कृतिकप्रस्तुतिभिः मोहिताः दर्शकाः

सांस्कृतिककार्यक्रमे देशस्य विभिन्नप्रदेशेभ्यः समागतैः कलाकारैः मैथिलीगीतसङ्गीतस्य मनोहराः प्रस्तुतयः प्रदत्ताः। सुप्रसिद्धा कनुप्रियाझा, इण्डियन आइडल-कार्यक्रमेण प्रसिद्धा सौम्यामिश्रा, प्रियाझा, अमरानन्दः, प्रियाराज़, शिवानीभट्टा, मुस्कानझा, कञ्चनझा, सुहानीभट्टा, शालिनीप्रिया च स्वप्रस्तुतिभिः दर्शकान् आनन्दितवन्तः।महाकवेः विद्यापतेः लोकप्रियपदानां गीतानां च प्रस्तुतिभिः समग्रं वातावरणं मिथिलामयं जातम्। मैथिलीनाटकस्य 'इज्जोत घरक अन्हार' इत्यस्य मञ्चनमपि समारोहस्य प्रमुखम् आकर्षणम् आसीत्। किशोरचौधरी- संयोजकत्वे रवीन्द्रबिहारीराजू-महोदयस्य निर्देशने प्रस्तुतस्य नाटकस्य माध्यमेन नारीस्वाभिमानस्य, सम्मानस्य, सामाजिकस्थितीनां च विषयाः प्रभावशालिरूपेण अभिव्यक्ताः।समितेः पदाधिकारिणः सदस्याश्च उपस्थिताःअस्मिन्न-वसरे चेतनासमितेः अध्यक्षः विवेकानन्दझा, उपाध्यक्षौ उमेशमिश्रः विपेन्द्रझा 'माधवः' च, मञ्जुझा, सचिवः जयदेवमिश्रः, बालमेलासंयोजकः सतीशचन्द्रझा, पण्डितः अवधेशझा, डॉ. राघवनाथझा, अमितमिश्रः, जितेन्द्रमिश्रः, हरिगोविन्दः, चन्दनठाकुरः, प्रभातरञ्जनः, उद्घोषकः मृणालकृष्णलयः, पूजाकुमारी, कल्पनाझा इत्यादयः समितेः पदाधिकारिणः, सदस्याः, गणमान्यजनाश्च उपस्थिताः आसन्।अनेन समारोहेण चेतनासमित्या महाकवेः विद्यापतेः साहित्यिकसांस्कृतिकपरम्परायाः भाविपीढ्यै प्रसारणाय, मैथिलीभाषायाः प्रचारप्रसाराय, मिथिलायाः लोककलानां परम्पराणां बालप्रतिभानां च प्रोत्साहनाय सार्थकः प्रयासः कृतः।

बिहारराज्ये उद्यानकृषेः नवक्रान्तिः, समूहकृष्या कृषकाणाम् आयवृद्धिः ग्रामीण- जीविकावसराणां च सृजनम्



समूहाधारितोद्यानकृषिः कृषकसमृद्धेः नूतनः मार्गः, आवेदनस्य अन्तिमतिथिः दिसम्बरमासस्य ३१ दिनाङ्कः

कृषकसमृद्धेः नूतनं सूत्रम्- समूहे उद्यानकृषिः, आयवृद्धिश्च- विजयकुमारसिन्हा

हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना।

बिहारसर्वकारस्य कृषिमन्त्री विजयकुमारसिन्हः अवदत् यत् चतुर्थकृषिरूपरेखायाः अन्तर्गतं 'ग्रामस्य उद्यानकृषिः, अस्माकं गौरवगाथा' इत्यभियानस्य माध्यमेन समूहाधारित-उद्यानकृषियोजनायाः सञ्चालनं क्रियते। अस्यां योजनायां चयनितानां फलोद्यानपादपानां सुगन्धिद्रव्यपादपानां च कृषये कृषकेभ्यः प्रतिएकरं लक्षं रूप्यकाणि, नागफणिफलस्य कृषये च प्रतिएकड़ं द्विलक्षं रूप्यकाणि यावत् अनुदानं प्रदास्यते।

मन्त्रिणा उक्तं यत् वित्तीयवर्षे २०२५-२६ पपीतफलस्य कृषये चत्वारिंशत् हेक्टेयर- क्षेत्रस्य लक्ष्यं निर्धारितम् आसीत्। वित्तीयवर्षे २०२६-२७ तु आमलकस्य कृषये पञ्चाशत् हेक्टेयर, एप्पलबेर-फलस्य कृषये त्रिंशत् हेक्टेयर, अमरूदफलस्य कृषये नवत्यधिकशतं हेक्टेयर, निम्बुकस्य कृषये दशाधिकद्विशतं हेक्टेयर, दाडिमफलस्य कृषये दश हेक्टेयर-क्षेत्रस्य च लक्ष्यं निर्धारितम् अस्ति। तेन उक्तं यत् अमरूदस्य, निम्बुकस्य, एप्पलबेर-फलस्य, बिल्वस्य, पनसस्य, आमलकस्य, दाडिमस्य, पपीतस्य, नागफणिफलस्य च कृषिः, सुगन्धिद्रव्यपादपानां कृषिश्च प्रोत्साह्यते। कृषकाः पारम्परिककृषेः सह लाभप्रदाम् उद्यानकृषिमपि स्वीकृत्य स्वकीयाम् आयं वर्धयेयुः इति शासनस्य उद्देश्यम् अस्ति। कृषिमन्त्री अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदिनः कृषकाणाम् आयवर्धनस्य, कृषेः स्वावलम्बनस्य लाभप्रदत्वस्य च, कृषकाणां कृष्युद्यमिरूपेण विकासस्य च सङ्कल्पं साकारयितुं राज्यसर्वकारः प्रतिबद्धः अस्ति। समूहाधारितोद्यानकृषिः अस्मिन् दिशि महत्त्वपूर्णा योजना अस्ति। अनया कृषकेभ्यः श्रेष्ठोत्पादनस्य, गुणवत्तापूर्णफलानां, विपणनसुविधानां च लाभः भविष्यति। ग्रामीणक्षेत्रेषु जीविकायाः स्वयमुद्यमस्य च नूतनाः अवसराः अपि सृज्यन्ते।

योजनायाः अन्तर्गतं चयनितानां फलोद्यानपादपानां सुगन्धिद्रव्यपादपानां च कृषये प्रतिएकड़ं लक्षं रूप्यकाणि, नागफणिफलस्य कृषये प्रतिएकड़ं द्विलक्षं रूप्यकाणि यावत् अनुदानं दीयते। अनुदानराशिः ६५:३५ इति अनुपातेन द्वयोः अंशयोः प्रदास्यते। कृषकाः न्यूनातिन्यूनं ०.२५ एकड़ात् अधिकतमं दश एकड़पर्यन्तं कृषिं कर्तुं योजनायाः लाभं प्राप्तुं शक्नुवन्ति।

मन्त्रिणा उक्तं यत् योजनायाः लाभः वास्तविक-कृषिकर्मिभ्यः एव प्राप्येत इति राज्यसर्वकारस्य प्राथमिकता अस्ति। अतः अस्यां योजनायां भूमिस्वामित्वविहीनाः बटाईदारकृषकाः अपि समाविष्टाः सन्ति। पपीताफलस्य कृषये भूमिसम्बद्धम् अनुबन्धपत्रं प्रदर्श्य बटाईदारकृषकाः अपि योजनायाः लाभं प्राप्तुं शक्नुवन्ति। योजनायां न्यूनातिन्यूनं त्रिंशत्प्रतिशतं महिला-कृषकाणां सहभागिता सुनिश्चितकर्तुं लक्ष्यं निर्धारितम् अस्ति। कृषिमन्त्री इच्छुकान् कृषकान् २०२६ तमस्य वर्षस्य दिसम्बरमासस्य ३१ दिनाङ्कपर्यन्तं कृषिविभागस्य डी.बी.टी. अन्तर्जालपुटस्य माध्यमेन अन्तर्जालद्वारा आवेदनं कर्तुम् आहूतवान्। योजनायाः लाभप्राप्तये डी.बी.टी. अन्तर्जालपुटे कृषकपञ्जीकरणम् आवश्यकप्रपत्राणां च आरोपणम् अनिवार्यम् अस्ति। आवेदने मिथ्याविवरणं वा प्रपत्रेषु त्रुटिः वा प्राप्ता चेत् आवेदनं निरस्तं कर्तुं शक्यते।

तेन सूचितं यत् योजनायाः अन्तर्गतं कृषिसमूहस्य न्यूनतमं क्षेत्रफलं ०.२५ एकड़म् आवश्यकम् अस्ति। रोपितानां पादपानां न्यूनातिन्यूनं पञ्चसप्ततिप्रतिशतं जीवितं भवेत् इति अनिवार्यम् अस्ति। एतेन पादपानां समुचितपालनं, उद्यानकृषिसमूहानां स्थायिविकासः, योजनायाः प्रभाविप्रकारेण क्रियान्वयनं च सुनिश्चितं भविष्यति। कृषिमन्त्री राज्यस्य कृषकान् समूहाधारितोद्यानकृषिं स्वीकर्तुं, योजनायाः लाभं प्राप्य स्वकीयाम् आयं वर्धयितुं, बिहारराज्यं च उद्यानकृषिक्षेत्रे अग्रगण्यं कर्तुं सहभागिनः भवितुम् आहूतवान्।

बिहारराज्ये कृषकाणाम् आयवर्धनाय, ग्रामीणक्षेत्रेषु जीविकायाः नूतनावसराणां सृजनाय, उद्यानकृषेः व्यावसायिककृषिरूपेण विकासाय च राज्यसर्वकारेण निरन्तरं प्रयासाः क्रियन्ते।

अयोध्यातः जनकपुरधामपर्यन्तं 'सरयू-कमला एक्सप्रेस'- रेलयानस्य शुभारम्भः

२०० यात्रिभिः 'स्मारिका-देयकेन' (Souvenir Ticket) कृता निःशुल्कयात्रा



गोरखपुरम्, दिनाङ्कः - २५ नवम्बर २०२६

अयोध्यातः नेपालदेशस्य जनकपुरधामपर्यन्तं प्रचालितायां ०४२९५-सङ्ख्याकायां 'सरयू-कमला उद्घाटन-विशेष-एक्सप्रेस' (Sarayu-Kamala Inaugural Special Express) नामिकायां रेलयाने गोरखपुरात् २०० यात्रिभिः 'स्मारिका-देयकेन' (Souvenir Ticket) निःशुल्कयात्रा सम्पन्ना। रेलप्रशासनेन उद्घाटनविशेषयाने उपविशतां यात्रिणां कृते विशेषतया इदं 'स्मारिका-देयकं' निर्मितम् आसीत्, यस्मिन् भारतस्य प्रधानमन्त्री नरेन्द्रमोदी तथा च नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः इत्यनयोः संयुक्तं चित्रम् अङ्कितम् आसीत्।

सहायक-वाणिज्यप्रबन्धकस्य ओङ्कारनाथवर्मणः स्थानकनिदेशकस्य (Station Director) रतनदीपगुप्तस्य च नेतृत्वे सरयू-कमला-एक्सप्रेस-यानेन गच्छद्भ्यः यात्रिभ्यः इदं स्मारिका-देयकं प्रदत्तम्। सायं पञ्चवादने द्वितीयमञ्चे (Platform No. 2) आगते याने स्मारिका-देयकं गृहीत्वा जनाः महता उत्साहेन यात्राम् आरब्धवन्तः। सायं ०५:४० वादने इदं रेलयानं गोरखपुरात् जनकपुरं प्रति प्रस्थितम्।

नियमित-रेलयानस्य समयसारिणी एवं विशेषताः

सञ्चालनदिवसाः: १५५९५/१५५९६-सङ्ख्याकं 'जनकपुरधाम (नेपाल)-अयोध्याकैंट-जनकपुरधाम (नेपाल)' रेलयानं सप्ताहे एकवारं चलिष्यति। इदम् अयोध्याकैंटस्थानकात् प्रतिसोमवासरे तथा च जनकपुरधामस्थानकात् प्रतिशनिवासरे प्रचाल्यते।

यानकक्षसंरचना (Coach Composition): अस्मिन् रेलयाने शयनयानश्रेण्याः (Sleeper) ०७, वातानुकूलित-तृतीयश्रेण्याः (3AC) ०३, वातानुकूलित-तृतीय-मितव्ययश्रेण्याः (3E) ०३ तथा च वातानुकूलित-द्वितीयश्रेण्याः (2AC) ०२ कक्षान् संयोज्य आहत्य १५ यानकक्षाः योजयिष्यन्ते। अस्मिन् याने सामान्यश्रेण्याः (General) कक्षः न भविष्यति।

यात्रानियमाः एवं प्रतिबन्धाः: अस्य रेलयानस्य कृते केवलं सुनिश्चित-देयकानि (Confirmed Tickets) एव निर्गमयिष्यन्ते; अत्र आर.ए.सी. (RAC) अथवा प्रतीक्षासूच्याः (Waiting) देयकानां पञ्जीकरणं न भविष्यति। अपि च यात्रिभ्यः अत्र रेल-अनुमतिपत्रस्य (Railway Pass), पी.टी.ओ. (PTO), विधायक-अधिकारपत्रस्य (MLA Coupon) अथवा अधिपत्रस्य (Warrant) आधारेण यात्रायाः सुविधा न लप्स्यते।





महाकविविद्यापतिसाहित्यसमीक्षा

- डॉ विघ्नेश झा, निदेशकः,
पण्डितरमेशझा, संस्कृत एवं समाज कल्याण संस्थान, गंगौली, सरिसवपाही, मधुबनी बिहारम्।

मैथिल- कोकिल- महाकविविद्यापतेः साहित्यिक- व्यक्तित्वस्य कृतित्वस्य च समालोचनात्मकमध्ययनम्

भारतीयसाहित्यस्य विशालायां परम्परायां संस्कृतभाषायाः, प्राकृतभाषायाः, अपभ्रंशभाषायाः, लोकभाषाणां च महत्त्वपूर्णं स्थानम् अस्ति। भारतीयसाहित्यस्य विकासे ये महाकवयः स्वप्रतिभया, काव्यकौशलेन, भावगाम्भीर्येण च अद्वितीयं स्थानं प्राप्तवन्तः, तेषु महाकविविद्यापतिः अन्यतमः अस्ति। सः मैथिलकोकिलः इति नाम्ना प्रसिद्धः। तस्य काव्येषु प्रेम, भक्ति, प्रकृतिसौन्दर्यं, मानवीयभावनाः, सामाजिकजीवनं च अत्यन्तं मनोहरतया चित्रितानि सन्ति।विद्यापतिः केवलं मैथिलीभाषायाः कविः नासीत्, अपि तु संस्कृतभाषायाः प्रकाण्डविद्वान्, इतिहासकारः, धर्मशास्त्रज्ञः, राजनीतिविशारदः, भक्तः च आसीत्। एतस्य साहित्ये संस्कृतपरम्परायाः गाम्भीर्यं लोकभाषायाः माधुर्यं च समन्वितं दृश्यते। अतः भारतीयसाहित्येतिहासे तस्य स्थानम् अत्यन्तं गौरवपूर्णम् अस्ति।महाकविविद्यापतेः जन्म मिथिलायां वर्तमानबिहारप्रदेशस्य मधुबनी- मण्डलान्तर्गत- विस्फीग्रामे अभवत् इति सामान्यतः स्वीक्रियते। तस्य जन्मकालविषये विद्वत्सु मतभेदाः सन्ति, तथापि चतुर्दशशताब्द्याः अन्तिमभागः पञ्चदशशताब्द्याः पूर्वार्धः च तस्य जीवनकालः इति मन्यते।तस्य पितुः नाम गणपतिः अथवा गणपति ठाकुरः इति प्रसिद्धम् अस्ति। सः विद्वान्, राजसभायां च प्रतिष्ठितः आसीत्। विद्यापतिः बाल्यादेव प्रतिभासम्पन्नः आसीत्। तेन संस्कृतव्याकरणं, वेदाः, पुराणानि, दर्शनशास्त्रं, धर्मशास्त्रं, काव्यशास्त्रं, राजनीतिशास्त्रं च सम्यगधीतानि।विद्यापतिः मिथिलायाः अनेकेषां राज्ञां संरक्षणं प्राप्तवान्। विशेषतः महाराजशिवसिंहस्य राजसभायां तस्य विशिष्टं सम्मानम् आसीत्। शिवसिंहस्य पत्नी लखिमा देवी अपि कलासाहित्ययोः संरक्षिका आसीत्।

विद्यापतिः स्वप्रतिभया राजसभायां विशिष्टं स्थानं प्राप्तवान्। तस्य साहित्ये तत्कालीनमिथिलायाः धार्मिकं, सामाजिकं, सांस्कृतिकं, राजनीतिकं जीवनं च प्रतिबिम्बितम् अस्ति।

विद्यापतेः व्यक्तित्वं बहुमुखप्रतिभायाः अद्भुतम् उदाहरणम् अस्ति। सः एकः श्रेष्ठः कविः, गद्यकारः, दार्शनिकः, भक्तः, इतिहासलेखकः तथा समाजचिन्तकः आसीत्।

तस्य साहित्यिकप्रतिभायाः प्रमुखाः विशेषताः सन्ति-

- भाषायाः माधुर्यम्।
- भावानां स्वाभाविकता।
- प्रकृतेः मनोहरं चित्रणम्।
- प्रेम्णः सूक्ष्ममनोवैज्ञानिकविश्लेषणम्।
- भक्तिभावस्य गाम्भीर्यम्।
- संस्कृतसाहित्यपरम्परायाः प्रभावः।
- लोकजीवनस्य यथार्थचित्रणम्।
- अलङ्काराणां स्वाभाविकप्रयोगः।

तस्य काव्येषु शृङ्गाररसस्य विशेषप्राधान्यं दृश्यते। तथापि भक्तिरसः, करुणरसः, शान्तरसः च तस्य साहित्ये महत्त्वपूर्णं स्थानं धारयन्ति। विद्यापतिना संस्कृतभाषायां, मैथिलीभाषायां तथा अवहट्टभाषायां विविधाः रचनाः विरचिताः। तस्य प्रमुखाः कृतयः निम्नलिखिताः सन्ति-

(क) कीर्तिलता- कीर्तिलता विद्यापतेः प्रसिद्धा ऐतिहासिककाव्यरचना अस्ति। अस्यां कृतौ मिथिलायाः तत्कालीनराजनीतिकस्थितेः, सामाजिक-जीवनस्य, राजवंशीयघटनानां वर्णनं प्राप्यते। अस्याः भाषारूपम् अवहट्टम् अस्ति। कविः तत्कालीनसमाजस्य वास्तविकस्थितिं चित्रयितुं प्रयत्नं कृतवान्। ऐतिहासिकदृष्ट्या अपि अस्याः ग्रन्थस्य महत्त्वम् अस्ति।

(ख) कीर्तिपताका- कीर्तिपताका अपि विद्यापतेः महत्त्वपूर्णा रचना अस्ति। अस्यां राजकीयघटनानां, वीरतायाः, शासनव्यवस्थायाः, तत्कालीनसमाजस्य वर्णनं दृश्यते। अस्याः रचनायाः माध्यमेन विद्यापतेः इतिहासबोधः, राजनीतिकदृष्टिः तथा काव्यप्रतिभा प्रकाशते।

(ग) पुरुषपरीक्षा- पुरुषपरीक्षा विद्यापतेः प्रसिद्धः नीतिपरकः ग्रन्थः अस्ति। अस्मिन् आदर्शपुरुषस्य गुणाः, सदाचारः, विवेकः, साहसम्, दानशीलता, सत्यनिष्ठा तथा कर्तव्यपरायणता वर्णिताः सन्ति। अस्य ग्रन्थस्य मुख्योद्देश्यं मानवस्य चरित्रनिर्माणम् अस्ति।

विद्यापतिः अस्मिन् ग्रन्थे कथानां माध्यमेन नैतिकशिक्षां प्रदत्तवान्। अयं ग्रन्थः केवलं तत्कालीनसमाजस्य दर्पणः न, अपि तु आधुनिकमानवजीवनस्य कृते अपि उपयोगी अस्ति।

(घ) लिखनावली- लिखनावली विद्यापतेः गद्यात्मकः महत्त्वपूर्णः ग्रन्थः अस्ति। अस्मिन् पत्रलेखनस्य नियमाः, राजकीयव्यवहारः, सामाजिकसम्बन्धाः, विविधप्रकारकाणां पत्राणां रचनाविधिः वर्णिता अस्ति।

अयं ग्रन्थः तत्कालीनप्रशासनिकव्यवस्थायाः तथा सामाजिकजीवनस्य अध्ययनाय उपयोगी अस्ति।

(ङ) गङ्गावाक्यावली- गङ्गावाक्यावली धार्मिकदृष्ट्या महत्त्वपूर्णा रचना अस्ति। अस्यां गङ्गायाः माहात्म्यं, पवित्रता, धार्मिकमहत्त्वं तथा तीर्थपरम्परायाः विवेचनं दृश्यते। गङ्गायाः प्रति विद्यापतेः श्रद्धा, भारतीय- धार्मिक- संस्कृतेः प्रभावः अस्यां कृतौ स्पष्टतया प्रकटितः अस्ति।

(च) शैवसर्वस्वसारः- अयं ग्रन्थः शैवधर्मसम्बद्धः अस्ति। अस्मिन् शिवोपासना, शिवतत्त्वं, धार्मिकाचाराः, आध्यात्मिक- विचाराः विवेचिताः सन्ति।विद्यापतेः शिवभक्तेः परिचयः अनेन ग्रन्थेन प्राप्यते।

(छ) मैथिलीपदावली- मैथिलीपदावली विद्यापतेः सर्वाधिकप्रसिद्धा काव्यरचना अस्ति। अस्यां राधाकृष्णयोः प्रेम, विरहः, मिलनं, मानं, अनुरागः, भक्तिभावः अत्यन्तं मधुरतया चित्रिताः सन्ति। अस्याः पदावल्याः कारणेन विद्यापतिः मैथिलकोकिलः इति नाम्ना प्रसिद्धः अभवत्।

विद्यापतेः काव्येषु शृङ्गाररसस्य सर्वोच्चं स्थानं वर्तते। तेन संयोगशृङ्गारस्य, वियोगशृङ्गारस्य उभयोः सुन्दरं चित्रणं कृतम्। राधाकृष्णयोः प्रेम्णः माध्यमेन कविः मानवीयप्रेमस्य विविधाः अवस्थाः अभिव्यक्तवान्। राधायाः लज्जा, मानः, अनुरागः, विरहवेदना, प्रतीक्षा, मिलनानन्दः तस्य पदेषु जीवन्ततया दृश्यन्ते। विद्यापतेः शृङ्गारवर्णनं केवलं शारीरिक-आकर्षणपर्यन्तं सीमितं नास्ति। तत्र मनसः सूक्ष्मभावानां, प्रेम्णः पवित्रतायाः, आत्मीयसम्बन्धस्य गहनं चित्रणम् अस्ति।

तस्य प्रसिद्धं पदम्-

"अनुखन माधव माधव सुमिरिते सुन्दरि भेलि मधाई।"

अत्र माधवस्य निरन्तरस्मरणेन नायिकायाः मनः पूर्णतया कृष्णमयं भवति। प्रेम्णः एषा अवस्था आध्यात्मिकतायाः दिशमपि संकेतयति।

विद्यापतेः भक्तिकाव्यम्- विद्यापतिः शृङ्गारकविः इति प्रसिद्धः, तथापि तस्य भक्तिकाव्यस्य महत्त्वम् अपि अत्यधिकम् अस्ति। सः शिवस्य, विष्णोः, दुर्गायाः, गङ्गायाः च भक्तः आसीत्। तस्य शिवभक्तिः विशेषतया प्रसिद्धा अस्ति। शिवं प्रति तस्य आत्मसमर्पणभावः अनेकासु रचनासु दृश्यते।तस्य प्रसिद्धं शिवभक्तिपद्यम्- "कखन हरब दुःख मोर हे भोलानाथ" इति अस्मिन् पद्ये भक्तस्य हृदयगतः दुःखभावः, ईश्वरं प्रति पूर्णविश्वासः, आत्मसमर्पणस्य भावना अभिव्यक्ता अस्ति। विद्यापतेः भक्तिः केवलं कर्मकाण्डपर्यन्तं सीमिता नास्ति। तस्य भक्तौ प्रेम, करुणा, श्रद्धा, आत्मनिवेदनस्य भावाः समन्विताः सन्ति।

विद्यापतेः काव्येषु प्रकृतिचित्रणं अत्यन्तं मनोहरम् अस्ति। ऋतवः, पुष्पाणि, लताः, वृक्षाः, नद्यः, सरांसि, चन्द्रः, मेघाः, पवनः तथा पक्षिणः तस्य काव्यस्य सौन्दर्यं वर्धयन्ति।

महाकविविद्यापतिसाहित्यसमीक्षा

क्रमशः... वसन्तऋतोः वर्णने प्रकृतेः नवीनसौन्दर्यं दृश्यते। आम्रवृक्षेषु मञ्जर्यः, कोकिलानां मधुरध्वनिः, मन्दसुगन्धितः पवनः तथा पुष्पितवनानि प्रेमभावनां जागरयन्ति ।तद्यथा-

आयल ऋतुपति राज वसन्त, धावल अलिकुल माधवी पन्थ।" प्रकृतिः तस्य काव्येषु केवलं वर्णनस्य विषयः नास्ति, अपि तु मानवीयभावानानां सहचरी अस्ति। नायिकायाः विरहे प्रकृतिरपि दुःखिता इव अनुभूयते, मिलनकाले सा आनन्दमयी भवति। एवं विद्यापतिः प्रकृतिं मानवीय- भावनाभिः सह सम्बद्धं कृतवान्।

विद्यापतेः भाषाशैली तस्य साहित्यस्य प्रमुखम् आकर्षणम् अस्ति। तस्य मैथिलीभाषा सरला, मधुरा, स्वाभाविकी भावपूर्णा च अस्ति।तस्य भाषायां लोकजीवनस्य शब्दाः, लोकोक्तयः, जनसामान्यस्य अभिव्यक्तयः प्रचुरतया दृश्यन्ते। संस्कृतभाषायाः शब्दसम्पदा, अलङ्कारपरम्परा, काव्यशास्त्रीयज्ञानं तस्य रचनासु प्रभावं जनयन्ति। तथापि तस्य भाषा कृत्रिमा न भवति। सा हृदयस्य सहजाभिव्यक्तिरूपेण प्रकटते। तस्य पदेषु अनुप्रासः, उपमा, रूपकम्, उत्प्रेक्षा तथा अन्ये अलङ्काराः स्वाभाविकतया प्रयुक्ताः सन्ति।

काव्येषु रसविधानम्-भारतीयकाव्यशास्त्रे रसस्य सर्वोपरि महत्त्वम् अस्ति। विद्यापतेः काव्येषु विविधरसानां सुन्दरः समन्वयः दृश्यते। विद्यापतेः काव्येषु नारीणां मनोभावानां सूक्ष्मं तथा सजीवं चित्रणं दृश्यते। विशेषतः राधायाः चरित्रं तस्य काव्यस्य केन्द्रबिन्दुः अस्ति। राधा केवलं प्रेमिका नास्ति, अपि तु सा प्रेम्णः, समर्पणस्य, विरहस्य, आध्यात्मिकानुभूतेः प्रतीकरूपेण दृश्यते। विद्यापतिः नारीहृदयस्य विविधाः अवस्थाः यथार्थतया चित्रितवान्। नायिकायाः लज्जा, उत्सुकता, मानः, ईर्ष्या, अनुरागः, विरहः तथा मिलनानन्दः तस्य पदेषु अत्यन्तं स्वाभाविकतया अभिव्यक्ताः सन्ति। अस्य दृष्ट्या विद्यापतिः मनोवैज्ञानिककाव्यस्य अपि श्रेष्ठः स्रष्टा आसीत्।

विद्यापतेः साहित्यं तत्कालीनमिथिलायाः सामाजिक- सांस्कृतिक- जीवनस्य महत्त्वपूर्णं प्रमाणम् अस्ति। तस्य रचनासु विवाहपरम्परा, पारिवारिक- सम्बन्धाः, धार्मिकानुष्ठानानि, उत्सवाः, राजकीयव्यवस्था, लोकाचाराः तथा सामाजिकमूल्यानि चित्रितानि सन्ति।

तस्य साहित्ये मिथिलायाः लोकसंस्कृतेः विशेषं महत्त्वं दृश्यते। ग्रामजीवनम्, पारिवारिक- जीवनं, स्त्रीपुरुषयोः सम्बन्धाः, धार्मिकविश्वासाः च तस्य काव्यस्य अभिन्नाङ्गानि सन्ति। विद्यापतिः स्वसाहित्येन मिथिलायाः सांस्कृतिक- परम्परां समृद्धां कृतवान्। अतः तस्य रचनाः साहित्यिकदृष्ट्या एव न, अपि तु ऐतिहासिक- सामाजिकदृष्ट्या अपि महत्त्वपूर्णाः सन्ति।

विद्यापतेः साहित्ये आध्यात्मिकतायाः, दार्शनिकचिन्तनस्य सुन्दरः समन्वयः दृश्यते। तस्य दृष्ट्या प्रेम केवलं लौकिकभावना नास्ति, अपि तु तत् ईश्वरप्राप्तेः साधनमपि भवितुम् अर्हति। राधाकृष्णयोः प्रेम्णः माध्यमेन जीवात्मनः परमात्मनः च सम्बन्धस्य प्रतीकात्मकं चित्रणं द्रष्टुं शक्यते। शिवभक्तिपदेषु आत्मसमर्पणस्य भावना, गङ्गामाहात्म्यवर्णने पवित्रतायाः विचारः तथा नीतिग्रन्थेषु सदाचारस्य महत्त्वं प्रतिपादितम् अस्ति।



अतः विद्यापतेः चिन्तनं लौकिकजीवनात् आध्यात्मिकजीवनपर्यन्तं विस्तृतम् अस्ति।

विद्यापतेः साहित्यस्य प्रभावः केवलं मिथिलायां न सीमितः अभवत्। तस्य पदावली बंगालप्रदेशे, नेपालदेशे, भारतस्य अन्येषु भागेषु अपि प्रसिद्धिम् अलभत। वैष्णवभक्तिपरम्परायां तस्य पदानां विशेषं स्थानम् अस्ति। चैतन्यमहाप्रभुः अपि विद्यापतेः पदैः प्रभावितः आसीत् इति परम्परायां प्रसिद्धम्। तस्य काव्यशैली अनन्तरवर्तिनां कवीनां कृते प्रेरणास्रोतः अभवत्। मैथिलीसाहित्यस्य विकासे तस्य योगदानम् अतुलनीयम् अस्ति। तस्य रचनाः लोकगीत- परम्परायामपि जीविताः सन्ति। विवाहोत्सवेषु, धार्मिकानुष्ठानेषु, सांस्कृतिक- कार्यक्रमेषु विद्यापतेः पदानि अद्यापि गायन्ति।

आधुनिकयुगे अपि विद्यापतेः साहित्यस्य महत्त्वं निरन्तरं वर्धते। तस्य रचनासु प्रेम, करुणा, भक्तिः, सदाचारः, मानवीयसम्बन्धाः, सांस्कृतिकचेतना इत्यादयः सार्वकालिकाः विषयाः सन्ति। वर्तमानसमाजे यदा मानवीयसम्बन्धेषु आत्मीयतायाः न्यूनता दृश्यते, तदा विद्यापतेः प्रेमप्रधानं साहित्यं मानवतायाः सन्देशं ददाति।

तस्य नीतिपरकग्रन्थाः सदाचारस्य, कर्तव्यनिष्ठायाः, चरित्रनिर्माणस्य प्रेरणां ददति। तस्य भक्तिकाव्यं मानवस्य अन्तःकरणे श्रद्धां तथा आध्यात्मिकचेतनां जागरयति। विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च विद्यापतेः साहित्यस्य अध्ययनं न केवलं भाषाज्ञानाय, अपि तु भारतीयसंस्कृतेः अवगमनाय अपि आवश्यकम् अस्ति। अत्रेदं वयं वक्तुं शक्नुमो यत् विद्यापतिः भारतीय- साहित्यस्य महान् प्रतिभाशाली कविः आसीत्। सः मैथिलीभाषायाः गौरवं वर्धितवान्, संस्कृत- साहित्य- परम्परायाः श्रेष्ठतां लोकभाषासु प्रसारितवान्। तस्य साहित्ये प्रेम्णः माधुर्यं, भक्तेः पवित्रता, प्रकृतेः सौन्दर्यं, नीतिशास्त्रस्य गाम्भीर्यं, लोकजीवनस्य वास्तविकता च एकत्र समुपलभ्यन्ते। सः केवलं स्वयुगस्य कविः नासीत्, अपि तु सर्वेषां युगानां कृते प्रेरणास्रोतः अस्ति। तस्य काव्यं मानवहृदयस्य सहजाभिव्यक्तिः अस्ति। तस्य पदानि अद्यापि जनमानसेषु जीवन्ति।

अतः अस्माभिः अत्र निःसन्देहं वक्तुं शक्यते यत्- विद्यापतिः मैथिलसाहित्यस्य मुकुटमणिः, भारतीय- काव्य- परम्परायाः गौरवः, प्रेमभक्त्योः अद्वितीयः गायकः आसीत्। तस्य साहित्यं भारतीयसंस्कृतेः अमूल्यनिधिः अस्ति। यावत् मैथिलीभाषा, भारतीयसंस्कृतिः, प्रेमभक्त्योः परम्परा जीविता भविष्यति, तावत् महाकविविद्यापतेः यशः अपि अक्षुण्णं स्थास्यति।

अन्ते च-

उत्साहसम्पन्नमदीर्घसूत्रं,
क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदं च,
लक्ष्मीः स्वयं याति निवासहेतोः॥
जयतु मैथिलकोकिलः
महाकविविद्यापतिः! इति शम्।।



ब्रिटिश-संसदि हिमाचलस्य समृद्धसंस्कृतेः गौरवमयी प्रस्तुतिः : निरमण्डस्य सुजाताशर्मा दीपावल्युत्सवे राज्यस्य परम्पराः उपस्थापितवती

शिमला / निरमण्डः, दिनाङ्कः - २५ नवम्बर २०२६। हिमाचलप्रदेशस्य निरमण्ड-उपमण्डलान्तर्गतस्य रल्लूरन्दलग्रामस्य निवासिनी सुजाताशर्मा ब्रिटिश-संसदि (British Parliament) आयोजिते दीपावल्युत्सवे प्रदेशस्य समृद्धां संस्कृतिं, परम्परां, विरासतं च अधिकृत्य प्रभावशालिनीं प्रस्तुतिं दत्तवती।लन्दननगरस्य एकस्मिन् मानसिकस्वास्थ्यचिकित्सालये चिकित्सालय-प्रबन्धकपदे (Hospital Manager) कार्यरता सुजाता इमम् अवसरं ब्रिटिश-सांसदस्य बॉब-ब्लैकमैन-महोदयस्य (Bob Blackman) आमन्त्रणेन तथा च ब्रिटेनदेशस्थस्य 'हिमाचली-लिङ्क-यू.के.' (Himachali Link UK) नाम्नः सङ्गठनस्य माध्यमेन प्राप्तवती।

प्रस्तुतेः मुख्यविशेषताः

पारम्परिकवेशभूषाः अस्मिन् अवसरे सुजाताशर्मा पारम्परिकहिमाचलीपरिधानं, शिरोवस्त्रं ('धाटू') तथा च पारम्परिकाणि आभूषणानि धारयित्वा समुपस्थिता आसीत्।

विषयवस्तुः पञ्चदशनिमेषपर्यन्तं (१५ मिनट) प्रचालितायाम् अस्यां प्रस्तुतौ तया हिमाचलप्रदेशस्य ऐतिहासिकीः, सांस्कृतिकीः, भौगोलिकीश्च विशेषताः अन्ताराष्ट्रियपटले सुस्पष्टतया उपस्थापिताः।

सुजाताशर्मणः अनेन प्रयत्नेन विदेशे अपि हिमाचलप्रदेशस्य लोकसंस्कृतेः परम्परायाश्च गौरववर्धनं जातम् अस्ति, यत् समग्रस्य प्रदेशस्य कृते गर्वस्य विषयः वर्तते।



सन्तगुरुनानकदेवः श्रीगुरुतेगबहादुरश्च

भारतीयज्ञानपरम्परायाः संवाहकौ स्तः — डॉ. विनोदकुमारः

मॉरिशसदेशात् मुख्यातिथिरूपेण समुपस्थितः प्रो. सत्यपालसिंहः,

अध्यक्षरूपेण हिमाचल विश्वविद्यालयतः प्रो. योगेन्द्र कुमारः मुख्यवक्ता

डॉ. विनोदकुमारः च स्वकीयविचारान् प्रस्तुतवन्तः

महेन्द्रगढ़म्, २४ नवम्बर २०२६। हरियाणाकेन्द्रीयविश्वविद्यालयस्य, महेन्द्रगढ़स्य स्वामीदयानन्दसरस्वतीपीठस्य तत्त्वावधानेन सन्तगुरुनानकदेवस्य जयन्त्युपलक्ष्ये तथा श्रीगुरुतेगबहादुरस्य बलिदान दिवसोपलक्ष्ये 'भारतीयज्ञानपरम्परायाः संवाहकौ सन्तगुरुनानकदेवः श्रीगुरुतेगबहादुरश्च' इति विषये विशिष्टस्य अन्तर्जालीयव्याख्यानस्य आयोजनम् अभवत्। अस्मिन् कार्यक्रमे मॉरिशसदेशात् प्रो. सत्यपालसिंहमहोदयः मुख्यातिथिरूपेण विशेषतया समुपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षतां हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः विभागाध्यक्षश्च प्रो. योगेन्द्रकुमारमहोदयः अकरोत्। इलाहाबादविश्वविद्यालयस्य, प्रयागराजस्य संस्कृत-पालि-प्राकृत-प्राच्यभाषाविभागस्य सहाचार्यः डॉ. विनोदकुमारमहोदयः मुख्यवक्तृरूपेण विषयस्य सारगर्भितं विवेचनम् अकरोत्।प्रो. सत्यपालसिंहमहोदयेन भारतीयज्ञानपरम्परायाः वैश्विकप्रासङ्गिकतायाः प्रतिपादनम् विहितम्। मुख्यातिथिः प्रो. सत्यपालसिंहमहोदयः स्वसम्बोधने गुरुनानकदेवस्य तथा गुरुतेगबहादुरस्य च विचाराणां वैश्विकप्रासङ्गिकताम् अवर्णयत्। तेन प्रतिपादितं यत् भारतीयज्ञानपरम्परा सम्पूर्णमानवतेः कल्याणाय, आध्यात्मिकचेतनायै, नैतिकतायै तथा विश्वबन्धुत्वभावनायै समर्पिता अस्ति। सन्तपरम्परायाः एतयोः महापुरुषयोः जीवनदर्शनम् अद्यापि समाजं सद्भावस्य, समानतायाः, सेवायाः, मानवीयमूल्यानां च मार्गे प्रेरयति। मॉरिशसदेशात् तस्य गरिमामयी सहभागिता कार्यक्रमस्य अन्तर्राष्ट्रीयस्वरूपं विशेषगौरवं च अवर्धयत्।मुख्यवक्ता डॉ. विनोदकुमारमहोदयः स्वव्याख्याने गुरुनानकदेवस्य शिक्षाः, एकेश्वरवादः, नामस्मरणम्, सेवा, समानता तथा सामाजिकसमरसतायाः सिद्धान्तान् विस्तरेण विवेचितवान्। तेन गुरोः तेगबहादुरस्य त्यागः, बलिदानम्, धार्मिकस्वातन्त्र्यम्, मानवीयाधिकाराः तथा सत्यनिष्ठा भारतीयसंस्कृतेः महान् गौरवः इति प्रतिपादितम्। एतयोः महापुरुषयोः शिक्षाः केवलं धार्मिक-आध्यात्मिकजीवनपर्यन्तं सीमिताः न सन्ति, अपितु वर्तमानसामाजिकपरिस्थितिषु अपि मानवतायाः, सहिष्णुतायाः, नैतिकचेतनायाश्च विकासाय अत्यन्तं प्रासङ्गिकाः सन्ति इति तेन स्पष्टम्। अध्यक्षीयसम्बोधने प्रो. योगेन्द्रकुमारमहोदयः अवदत् यत् भारतीयसन्तपरम्परा सदैव समाजं रूढिभ्यः मुक्तं कर्तुं, मानवीयैकतां स्थापयितुं तथा आध्यात्मिकनैतिकचेतनायाः प्रसारे महत्त्वपूर्णां भूमिकां निर्वहति। गुरुनानकदेवस्य तथा गुरोः तेगबहादुरस्य जीवनदर्शनं भारतीयज्ञानपरम्परायाः समृद्धेः व्यापकतायाश्च परिचायकम् अस्ति। एतेषां महापुरुषाणां शिक्षाः युवपीढ्याः समीपं प्रापयितुं वर्तमानकाले अत्यावश्यकम् अस्ति। कार्यक्रमस्य संयोजनं स्वामीदयानन्दसरस्वतीपीठस्य पीठाध्यक्षा तथा संस्कृतविभागस्य सहाचार्या डॉ. सुमनराण्या कृतम्। सा सर्वेभ्यः अतिथिभ्यः, मुख्यवक्त्रे, अध्यक्षाय तथा प्रतिभागिभ्यः कृतज्ञतां प्रकटयन्ती अवदत् यत् स्वामीदयानन्दसरस्वतीपीठम् भारतीयज्ञानपरम्परायाः, महापुरुषाणां जीवनदर्शनस्य, सांस्कृतिकमूल्यानां च प्रचारप्रसाराय निरन्तरं शैक्षणिक-बौद्धिककार्यक्रमानाम् आयोजनं करोति। कार्यक्रमस्य शुभारम्भः संस्कृतभारती-हरियाणायाः विस्तारिकया रजनीमहोदयया प्रस्तुतया सरस्वतीवन्दनया अभवत्। तस्याः भावपूर्णया वन्दनया कार्यक्रमे आध्यात्मिकं सांस्कृतिकं च गौरवं समायोजितम्। कार्यक्रमस्य कुशलं मञ्चसञ्चालनम् इन्दिरागान्धीविश्वविद्यालयस्य, मीरपुरस्य, रेवाड्याः संस्कृतविभागस्य सहाचार्या मनीषामहोदयया कृतम्। तया प्रभावशालिन्या सुव्यवस्थितया च शैल्या कार्यक्रमस्य सञ्चालनं कृतम् तथा सर्वेषाम् अतिथीनां वक्तृणां च परिचयः प्रस्तुतः।

कार्यक्रमे देशविदेशेभ्यः विद्वांसः, शोधार्थिनः, विद्यार्थिनश्च उत्साहपूर्वकं सहभागिताम् अकुर्वन्। अस्य व्याख्यानस्य माध्यमेन गुरुनानकदेवस्य तथा गुरोः तेगबहादुरस्य विचारान् समकालीनसामाजिकवैश्विकपरिप्रेक्ष्ये अवगन्तुं सार्थकः अवसरः प्राप्तः।

भारतस्य अन्तरिक्ष-अर्थव्यवस्था दशकन्यूनसमये ४५-अर्बडॉलरपरिमिता भविष्यति : पञ्चमे भारतीय-अन्ताराष्ट्रिय-अन्तरिक्षसम्मेलने केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः

नवदेहली, दिनाङ्कः - २५ नवम्बर २०२६ विज्ञान-प्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः अवदत् यत् भारतस्य अन्तरिक्ष-अर्थव्यवस्था सम्प्रति प्रायः नव-अर्बडॉलरपरिमिता (९ अर्बडॉलर) अस्ति तथा च आगामिदशकन्यूनसमये एव सा वर्धित्वा प्रायः ४५-अर्बडॉलरपरिमिता भविष्यति इति सम्भावना वर्तते। अद्य नवदेहल्याम् आयोजिते पञ्चमे भारतीय-अन्ताराष्ट्रिय-अन्तरिक्षसम्मेलने भाषमाणः सः उक्तवान् यत् अल्पेषु एव वर्षेषु भारते अन्तरिक्षसम्बद्धानां संस्थानां सङ्ख्या वर्धित्वा प्रायः पञ्चशतं (५००) जाता अस्ति, यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नीतिगतसुधाराणां सुपरिणामः अस्ति।

अन्तरिक्षक्षेत्रे निर्णायकपरिवर्तनानि

नीतिगतपरिष्काराः- डॉ. सिंहः स्पष्टीकृतवान् यत् 'न्यू-स्पेस-इण्डिया-लिमिटेड' (NSIL) इत्यस्याः स्थापना, 'इन-स्पेस' (IN-SPACe) इत्यस्य सृजनं तथा च निजीसहभागितायै अन्तरिक्षक्षेत्रस्य उद्घाटनम् इत्येतैः कदमैः अस्मिन् क्षेत्रे निर्णायकाः परिवर्तनाः अभवन्।

पी.एम.-गतिशक्ति-योजनायां योगदानम्: सः अवदत् यत् 'पी.एम.-गतिशक्ति-राष्ट्रिय-महायोजनायाः' (PM Gati Shakti National Master Plan) अन्तर्गतम् अन्तरिक्ष-आधारित-अनुप्रयोगानां (Space Applications) माध्यमेन आधारभूतसंरचनायाः योजना-निर्माणे, परियोजनानां समयबद्धपूर्णतायां, व्ययन्यूनीकरणे, अपशिष्टनिवारणे च महती सहायता प्राप्ता अस्ति। एते अनुप्रयोगाः सर्वैः मन्त्रालयेभ्यः सह संयुक्ताः सन्ति।

निजीनिवेशस्य आह्वानम्: भारतं वैश्विकस्तरे प्रतिस्पर्धिनीम् अन्तरिक्ष-अर्थव्यवस्थां निर्मातुं डॉ. सिंहः देशस्य निजीसंस्थाः अस्मिन् क्षेत्रे अधिकं निवेशं कर्तुम् आहूतवान्।

गगनयान-अभियानम् अन्तिमचरणे अस्मिन् कार्यक्रमे भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनस्य (ISRO) अध्यक्षः डॉ. वी. नारायणनः तथा च अन्तरिक्षविभागस्य सचिवः डॉ. पवनकुमारगोयन्का अपि समुपस्थितौ आस्ताम्। अस्मिन् अवसरे डॉ. नारायणनः सूचितवान् यत् भारतस्य महत्वाकाङ्क्षि मानव-अन्तरिक्ष-अभियानं 'गगनयानम्' सम्प्रति स्वस्य अन्तिमचरणे वर्तते।

व्याकरणचिन्तनम्

अस्मिन् क्रमलेखे तुमुन्-प्रत्ययसम्बद्धा सरलव्याख्या सोदाहरणम्, अभ्यासाय चात्र प्रस्तूयते।

१. परिचयः-तुमुन्- तुम् - इति कृत्-प्रत्ययः वर्तते।

अयं धातोः परे भवति, निमित्तार्थे (to, in order to) इति। सूत्रम्-

'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'- पाणिनिः-३.३.१०।

अस्याशयः यत्,

क्रियार्थायां क्रियायाम् उपपदे भविष्यदर्थे धातोः तुमुन्- ण्वुलौ प्रत्ययौ भवतः इति।

तुमुन् अव्ययपदम् अस्ति। अस्य लिङ्ग- वचन- विभक्त्यादिकं न भवति।

२. प्रस्तुति-विधिः-धातुः + तुम्, गुणः भवति।

पठ् + तुमुन् = पठितुम्,

गम् + तुमुन् = गन्तुम्,

कृ + तुमुन् = कर्तुम्,

दा + तुमुन् = दातुम्,

सेट्-धातौ 'इ' आगच्छति- पठितुम्, लिखितुम्।

अनिट्-धातौ 'इ' नागच्छति- गन्तुम्, कर्तुम्, दातुम्।

३. प्रयोगः-क) निमित्तार्थे-

पठितुं गच्छति।

ख) इच्छार्थे-

पठितुम् इच्छति।

ग) सामर्थ्यार्थे-

पठितुं शक्नोति।

घ) योग्यताऽर्थे-

वक्तुं योग्यः।

अभ्यासाय अत्र उपस्थाप्यन्ते, यथा-

क) निमित्तार्थे-

१. विद्यार्थी पठितुं गुरुकुलं गच्छति।

२. महेशः खेलितुं क्रीडाङ्गणं गच्छति।

३. पिपासुः रामः जलं पातुम् अगच्छत्।

४. वयं पुस्तकं क्रेतुं पुस्तकापणं गच्छामः।

५. भक्तगणः देवमूर्तिं द्रष्टुं मन्दिरं गच्छति।

६. भगिनी भोजनं पक्तुं पाकशालां गच्छति।

७. शिष्यः ज्ञानं लब्धुं विद्यालयं गच्छति।

८. कृषकः क्षेत्रं कर्षुं गच्छति।

९. त्वं स्नातुं नदीं गच्छसि किम्?

१०. पितामहः विश्रामं कर्तुं गृहम् आगच्छति।

ख) इच्छाऽर्थे-

११. केशवः पत्रं लेखितुम् इच्छति।

१२. सर्वे संस्कृतं पठितुम् इच्छन्तु।

१३. बालिकाः गीतं गातुम् इच्छन्ति।

१४. भवन्तः भोजनं खादितुम् इच्छन्ति किम्?

१५. यूयं चलचित्रं द्रष्टुम् इच्छथ वा ?

१६. मित्राणि मया सह मेलितुम् इच्छन्ति, तस्मात् अहं प्रसन्नः अस्मि।

१७. आवां तत्र स्थातुम् इच्छावः।

१८. सर्वे भागवतकथां श्रोतुम् इच्छन्ति।

१९. शिशुः दुग्धं पातुम् इच्छति।

२०. ज्ञानी अस्मान् बोधयितुं इच्छति।

ग) सामर्थ्यं / योग्यताऽर्थे वा-

२१. जिज्ञासुः प्रश्नं प्रष्टुं शक्नोति।

२२. अहं सर्वत्र गन्तुं न शक्नोमि।

२३. विद्यालयीयाः निपुणच्छात्राः उत्तरं दातुं समर्थाः सन्ति।

२४. सेना देशं रक्षितुं समर्था अस्ति।

२५. त्वं वक्तुं सज्जः भव।

२६. अहं भक्तिकथां श्रोतुम् उत्सुकः अस्मि।

२७. कर्तुं योग्यः समयोऽयम्, अतः तत् क्रियताम्।

२८. धर्मं रक्षितुं सदा प्रयतामहे।

२९. भवताम् अध्यापकः पाठयितुम् आगच्छति।

३०. स्वजीवनं सफलं कर्तुं त्वं यथेष्टं परिश्रमं कुरु।

५. सामान्यरूपावली-

धातुः- तुमुन्-रूपम्

पठ्- पठितुम्, गम्- गन्तुम्,

कृ- कर्तुम्, दा- दातुम्,

पा- पातुम्, खाद्- खादितुम्,

लिख्- लेखितुम्, दृश्- द्रष्टुम्,

श्रु- श्रोतुम्, वद्- वक्तुम्,

६. अवधेयम् -

तुमुन्- तुम्- अव्ययम्। क्त्वा/ल्यप्- प्रत्ययान्तपदमपि अव्ययम् एव (प्राक्तनलेखे तद्दर्शितमस्ति)

अर्थः- निमित्तम्, इच्छा, सामर्थ्यम्। गुणः भवति, रूपभेदः च नास्ति। इत्येतादृशानि पदानि व्याकरणे तुमुनन्तानि, अव्ययानि च कथ्यन्ते इति, शम्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्यतन-कार्यक्रमस्य आमन्त्रणेन कृतज्ञताम् अर्पयामि तुभ्यम्। शृणु तावत् प्रथमां विचित्रां वार्ताम्। ह्यः इस्तान्बुल-नगरे एका विचित्रा घटना जाता। एका सिंही उपनगरस्य मार्गान् आगता। तस्याः अन्वेषणाय आरक्षकैः ड्रोन-यन्त्राणि प्रयुक्तानि। जनाः सुरक्षायै गृहेषु एव स्थिताः। परन्तु एकेन जनेन सिंह-वेषः धृतः, स च अन्वेषणाय तत्र गतः!

नन्दिनी- अहो! तेन जनेन अतीव हास्यकरं कर्म कृतम्! अधुना मङ्गल-ग्रहस्य एका रोचिका वार्ता अस्ति। नासा-संस्थया ह्यः नूतनानि चित्राणि प्रकाशितानि। तत्र मङ्गल-ग्रहे आलुक-पर्पट- सदृशाः सूक्ष्माः प्रस्तराः दृष्टाः। क्यूरियोसिटी- यानेन एते प्रस्तराः प्राप्ताः।

काव्या- अद्भुतम्! मङ्गल-ग्रहस्य एताभिः शिलाभिः मम अपि बुभुक्षा वर्धिता! इदानीं तन्त्रज्ञान-क्षेत्रस्य एका महत्त्वपूर्णा वार्ता वर्तते। ओपन- ए- आई- संस्थायाः मुख्य-वैज्ञानिकेन ह्यः एकः प्रस्तावः कृतः। तेन उक्तं यत् कृत्रिम-मेधायाः क्षेत्रे उद्योगसीमाः स्थापनीयाः।

नन्दिनी- सत्यम्। तेन वैज्ञानिकेन समीचीनं चिन्तितम्। यन्त्राणां नियन्त्रणम् आवश्यकम् एव। अधुना अन्तिमा विज्ञानवार्ता अस्ति। परह्यः मस्तिष्वैज्ञानिकैः एकं नूतनं संशोधनं कृतम्। तैः मस्तिष्के तादृशाः कोशाः दृष्टाः ये निद्रां जनयन्ति। वैज्ञानिकैः मूषकेषु एतेषां कोशानां कार्यं निरुद्धम्। ततः ते मूषकाः प्रतिशतम् (७०%) सप्तत्या न्यूनया निद्रया अपि स्वस्थाः स्थिताः!

काव्या- अहो! एतत् अद्भुतं संशोधनम्! परन्तु मम तु निद्रा अतीव प्रिया अस्ति। एतासां विचित्रवार्तानां कृते कृतज्ञताम् अर्पयामि तुभ्यम्, नन्दिनि!

नन्दिनी- अहमपि कृतज्ञताम् अर्पयामि तुभ्यम्, काव्ये। पुनर्मेलिष्यामः। नमो नमः।

वन्दे संस्कृतमातरम्

"लौकिकन्यायकोशः"।। (२)

"अग्निकुण्डन्यायः"

पूजायाः कृते आवश्यकानि जलम् इत्यादीनि वस्तूनि शीघ्रम् उपलब्धानि भवन्तु इति एकः ब्राह्मणः एकं कुम्भं जलेन पूरयित्वा तस्मिन् एव कुम्भे अग्निम् अपि स्थापितवान् रात्रौ। प्रातःकाले जलम् अग्निः, इतराणि वस्तूनि च शीघ्रम् एव एकत्र लभ्यन्ते इति आशया सः धावित्वा आगतः परं सः किं पश्यति? अग्नेः ज्वलद्ङ्गाराः शान्ताः अभवन् तथा कुम्भे वर्तमानं जलम् अपि मलिनम् अभवत्। येषां प्रपञ्चज्ञानं न भवति तादृशानां मन्दबुद्धीनां जनानां विषये अस्य न्यायस्य उपयोगः भवति।



हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

सप्तपञ्चाशत्तमे भारतीय-अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवे (IFFI) 'हाफ' नामकं मलयालम-चलच्चित्रं प्रदर्श्यते

निर्देशकस्य समजादस्य मलयालम-चलच्चित्रं 'हाफ' (Half) सप्तपञ्चाशत्तमस्य (५७) भारतीय-अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवस्य (IFFI) विशिष्टप्रदर्शनीचरणे (Gala Premiere) प्रदर्श्यते। अस्मिन् चलच्चित्रे अमला पॉल, रञ्जीतसजीवः, ऐश्वर्या राज, अब्बासः च प्रमुखभूमिकासु सन्ति।

संवादे अभिनेत्री अमला पॉल अवदत् यत् अस्मिन् चलच्चित्रे पिशाचशैली (Vampire Genre) नवीनरीत्या प्रस्तुता अस्ति। दीर्घकालानन्तरं चलच्चित्रजगति प्रत्यागमनं कुर्वन् अभिनेता अब्बासः उक्तवान् यत् 'हाफ'-चलच्चित्रे तेन स्वस्य पूर्वभूमिकाभ्यः सर्वथा भिन्नं पात्रं निर्वोढुम् अवसरः प्राप्तः। चलच्चित्रस्य मुख्यः अभिनेता रञ्जीतसजीवः अवदत्यत् अस्मिन् चित्रे अलौकिकतत्त्वैः सह साहसिकदृश्यानां (Action) पाश्चात्यशैल्याश्च अपि मिश्रणम् अस्ति। चलच्चित्रे विना वचनं संवादं कुर्वन्त्याः पात्रस्य भूमिकां निर्वहन्ती ऐश्वर्या राज साहसिकदृश्यानां नृत्यसंयोजनस्य शिक्षणे आगतानां कठिनाईनां विषये वर्णितवती। सा उक्तवती यत् तया एतेषां दृश्यानां गतिविधयः लयश्च चरणबद्धरीत्या शिक्षणीयाः अभवन्। चलच्चित्रस्य अन्यः कलाकारः श्रीकान्तमुरली अपि संवादे अवदत् यत् अस्य चलच्चित्रस्य शैली, पटकथा, प्रस्तुतिश्च इदम् अन्येभ्यः मलयालम-चलच्चित्रेभ्यः पृथक् करोति।

पेज बचाओ वृक्ष बचाओ अभियान के अन्तर्गत हिमसंस्कृतम् न्यास (पं.86/2026) द्वारा ई-दैनिक संस्कृत समाचार पत्र की पहल हिमसंस्कृतवार्ता



सुखस्य परिभाषा(लघुकथा)

मूलहिन्दीलेखिका-
सुश्री संगीतादास, पूर्वविज्ञानशिक्षिका,
डीएवी पब्लिक स्कूल, बरारी, भागलपुरम्
अनुवादकः- डॉ. विमलेश झा

एकदा अहं रेलस्थानकं प्राप्तवती। तत्र गत्वा रेलयानस्य आगमनसमयं पृष्टवती। ज्ञातं यत् रेलयानस्य आगमने प्रायः होरैकस्य विलम्बः भविष्यति। घटिकां दृष्टवती, समयः पञ्चवादनम् एकादश निमेषाश्च आसीत्।

अहं एकस्यां पीठिकायाम् आसनम् स्वीकृतवती। अधुना तु रेलयानस्य विलम्बेन मम मनसि रोषः न जायते। समयः कथं यापनीयः इति चिन्ता अपि न भवति। यतोहि मया समययापनस्य एकः उपायः अन्विष्टः अस्ति। सः उपायः अस्ति- मनसः स्वच्छन्दविचरणम्। अहं मनसं नियन्त्रणमुक्तं कृत्वा तं यत्र कुत्रापि विचरितुं ददामि। अतीतस्य, वर्तमानस्य, भविष्यस्य च चिन्ताः विस्मृत्य किम् उचितम्, किम् अनुचितम् इत्यस्मात् विचारात् अपि मुक्ताऽस्मि।

सत्यमेव वदामि, कदाचित् विद्युतारासु उपविष्टाः पक्षिणः, कदाचित् द्वितीयरेलस्थानकमञ्चस्य परतः स्थिताः वृक्षसमूहाः, कदाचित् च रेलस्थानकमञ्चे पतितानि कज्जलवर्णानि भूचणकफलानां त्वक्-खण्डानि च पश्यन्ती अहं कथं कालं यापयामि, तत् ज्ञातुमपि न शक्नोमि। अद्य तु मनसः स्वच्छन्दविचरणं हनुमच्चालीसापाठस्य ध्वनिना विरामः प्राप्तः। अहं दृष्टवती यत् रेलस्थानकमञ्चे मत्तः किञ्चित् दूरे एकः प्रौढवयस्कः पुरुषः उपविष्टः आसीत्। तस्य आकृतिं दृष्ट्वा सः भिक्षुकः इति न प्रतिभाति स्म। सः यात्री अपि नासीत्। किन्तु तस्य समीपे एकं स्यूतम् आसीत्, यस्मिन् बहूनि वस्तूनि पूर्णतया स्थापितानि आसन्। एकस्मिन् प्लास्टिकपात्रे जलम् अपि आसीत्। सः मलिनां धौतवस्त्रां जानुभ्यः उपरि कृत्वा कटिवस्त्रसदृशं (लुंगी) बद्धवान् आसीत्। उपरि च लघुबाहुकं सामान्यनारङ्गवर्णीयं मलिनं कंचुकं (कुर्ता) धारितवान् आसीत्। तस्य शिरसि अतीव लघ्वः केशाः आसन्। सः अत्यन्तम् आनन्देन स्वकरतलध्वनिभिः लयबद्धरीत्या हनुमान् चालीसां पठति स्म। अहं तं पश्यन्ती आसम्। तस्य मुखमण्डले असन्तोषस्य एका अपि रेखा नासीत्। हनुमच्चालीसापाठस्य समाप्तौ सः परमभक्तिभावेन हस्तौ संयोज्य भगवन्तं प्रणमति स्म। ततः स्वस्य स्यूतात् सः एकां दन्तधावनीं निष्कासितवान्। अनन्तरं तालिकां दत्त्वा-

"राम जपो-राम जपो - राम जपो मन मां "

इति मधुरस्वरेण गातुम् आरब्धवान्।

कः अयं पुरुषः? न भिक्षुकः, न यात्री, न च उन्मत्तः। सम्भाव्यते यत् सः रेलस्थानके एव रात्रौ शयनं करोति। किं तस्य गृहं नास्ति? तस्य वयः प्रायः पञ्चत्वारिंशत् तः पञ्चाशत् वर्षाणां मध्ये भविष्यति। किं सः किमपि कार्यं करोति? यदि करोति, तर्हि कीदृशं कार्यम्? 'सुखम्' इत्यस्य सामान्यपरिभाषानुसारं तं सुखी इति वक्तुं न शक्यते। तस्य भविष्यत्कालः अपि सम्भवतः असुरक्षितम् अस्ति। तथापि तस्य मुखे एतादृशी निश्चिन्तता कथम्? कस्याः आशायाः प्रभावेण तस्य हृदये ईश्वरं प्रति एतादृशी भक्तिः उद्भूता?

तं पश्यन्ती अहं महत् सुखम् अनुभवामि स्म। सत्यमेव वदामि, तेषु कतिपयेषु क्षणेषु अहं स्वापरिमितं दुःखं विस्मृतवती। तेषु क्षणेषु मया यावती शान्तिः अनुभूता, सा शब्दैः वर्णयितुम् अहम् अशक्या अस्मि। "जय धनुर्धारी!" इति उच्चैः घोषं कृत्वा सः उत्थितवान्। ततः रेलस्थानकमञ्चस्य प्रान्तं गत्वा जलपात्रस्थितेन जलेन स्वां दन्तधावनीं प्रक्षालितवान्। मम मनः आकुलम् अभवत्।

सुखस्य सामान्यपरिभाषामाधृत्य मनः "सः सुखी अस्ति" इति न स्वीकरोति। किन्तु सः दुःखी अपि न दृश्यते। तर्हि सः किम् अस्ति? वस्तुतः सुखं किम्? सुखम् इति किम् उच्यते? किं सुखस्य परिभाषा सर्वेषां कृते भिन्ना भवति?

सम्भवतः आम्। सम्भवतः सुखस्य अर्थः प्रत्येकं मनुष्यस्य कृते भिन्नः भवति।

कश्चित् सत्यनिष्ठः सज्जनः च भूत्वा कष्टानि सहने एव सुखं शान्तिं च प्राप्नोति। अपरः तु अनाचारस्य, भ्रष्टाचारस्य, दुष्टतायाश्च मार्गम् अनुसृत्य कुबेरतुल्यं धनं सञ्चित्य एव सुखम् इति मन्यते। वस्तुतः सुखं धनसम्पत्तौ, वैभवे, भौतिकसुविधासु वा निहितं नास्ति। सुखं तु मनसः सन्तोषे, आत्मनः शान्तौ, ईश्वरं प्रति श्रद्धायां च निहितम् अस्ति।

"सन्तोषः परमं सुखम्" इति कथनं वस्तुतः जीवनस्य महान् अनुभवः अस्ति।



अबूधाबी-युवराजेन शेख-खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाहयान-महोदयेन सह 'आई.आई.टी.-दिल्ली-अबूधाबी'-परिसरस्य प्रथम-समूहस्य स्नातकानां मेलनम्



अबूधाबी-प्रदेशस्य युवराजः (Crown Prince) तथा च अबूधाबी-कार्यकारिपरिषदः अध्यक्षः शेख-खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाहयान-महोदयः भारतीयप्रौद्योगिकीसंस्थानस्य (IIT) दिल्ली–अबूधाबी-परिसरस्य प्रथमसमूहस्य (First Batch) अनेकैः स्नातकैः सह अमिलत्। शेख-खालिद-महोदयः स्नातकेभ्यः तेषां शैक्षणिकसिद्धीनां कृते वर्धापनं दत्तवान् तथा च तेषां व्यावसायिकजीवने निरन्तरं सफलतायाः उत्कृष्टतायाश्च कामनां कृतवान्। अस्मिन् अवसरे संयुक्त-अरब-अमीरातस्य (UAE) कार्यकारिविषयप्राधिकरणे रणनीतिकविषयाणां कार्यकारिनिदेशिका सुश्री रीमा अल मोकर्रब, भारतीयप्रौद्योगिकीसंस्थान-देहल्याः निदेशकः रङ्गनबनर्जी तथा च आई.आई.टी.-दिल्ली–अबूधाबी-परिसरस्य कार्यकारिनिदेशकः शान्तनुरॉयः अपि समुपस्थिताः आसन्।

प्रथमसमूहस्य छात्रैः सद्यः एव संस्थानात् 'ऊर्जासङ्क्रमणम् एवं स्थिरता' (Energy Transition and Sustainability) इत्यस्मिन् विषये एम.टेक्. (M.Tech) उपाधिः प्राप्ता अस्ति। भारतस्य शिक्षामन्त्री श्रीप्रल्हादजोशी २०२६ तमस्य वर्षस्य नवम्बरमासस्य १९ तमे दिनाङ्के अबूधाबीनगरे आयोजितस्य दीक्षान्तसमारोहस्य अध्यक्षतां कृतवान्। इदं संस्थानं भारत-संयुक्त-अरब-अमीरातयोः मध्ये रणनीतिकसहभागितायाः तथा च उच्चशिक्षा, वैज्ञानिकानुसन्धानम्, नवाचारपारिस्थितिकीतन्त्रम् (Innovation Ecosystem) चेत्यादिषु क्षेत्रेषु द्विपक्षीयसहयोगस्य सुदृढीकरणाय द्वयोः देशयोः साझीकृतदृष्टिकोणं प्रतिपादयति।

संयुक्त-अरब-अमीरातदेशे भारतीयप्रौद्योगिकी-संस्थानस्य स्थापनायाः निर्णयः २०२२ तमस्य वर्षस्य फरवरीमासे गृहीतः आसीत्। भारतस्य प्रधानमन्त्री नरेन्द्रमोदी तथा च अबूधाबी-प्रदेशस्य तत्कालीनः युवराजः शेख-मोहम्मद-बिन-जायद-अल-नाहयान-महोदयः स्वयोः आभासी-शिखरसम्मेलने (Virtual Summit) अस्मिन् विषये सहमतिं प्रकटितवन्तौ आस्ताम्। आई.आई.टी.–अबूधाबी-परिसरे सम्प्रति षट् (६) पाठ्यक्रमाः प्रचलन्ति, अत्र च त्रयोदशाधिकेभ्यः (१३+) देशेभ्यः छात्राः शोधार्थिनश्च सम्मिलिताः सन्ति।